

संस्कृतोद्धारव्रतिनः पवित्रपीठरक्षणतत्पराः विविध-
विरुदावलीविभूषिता वर्तमानमहन्त-
श्रीमन्तः शान्तिप्रसादा महाराजाः



 162


संसारासुखसारसंसृतिमतिभ्रान्त्या विहीनाः सदा
कुर्वन्त्येव वरं व्रतं प्रतिदिनं शान्तिप्रसादा मुदा ॥

रामदासप्रिया धीरा देवभाषापरायणाः
श्रीमच्छान्तिप्रसादास्ते धन्या दानार्थमुद्यताः ।
नवनवति-वर्षाणि जीविता अन्नदाः सुखम्
शान्तिप्रसादाः किन्त्वेते जीवन्तु शरदां शतम् ॥

सोऽयं . श्रीमदशेषधीरमुकुटालङ्कारहीरायितो
मान्यः शान्तिप्रसादशास्त्रिधिषणाधीशो महापण्डितः ।
वेदान्तादिसमस्तशास्त्रनिचये निष्णात आराध्यते
सौराष्ट्रे सततं स्वशिष्यनिवहैर्मोमुद्यमानः प्रभुः ॥

अयं यथा पाणिनिपद्धतिज्ञो मीमांसया पावितवाक्सुधाब्धिः ।
तथैव लक्ष्मीपतिलब्धकीर्तिः सुधीव्रजक्षेत्रधनाम्बुवर्षी ॥

श्रीमालवीयमुनिमानसनिर्गता या
श्रीपाणिनीयसरयूःपदनीरपूर्णा



शान्तिप्रसादधनदाम्बुधिमेत्य शश्व-
च्चन्द्रप्रबोधमधिविज्ञनभोऽभिनन्देत् ॥

अहमपि निजकीर्तिम्पाणिनीयप्रबोधं
विबुधवरमहन्ते श्रीजशान्तिप्रसादे ।
धनदजलधिकल्पे पाणिनीयाध्वविज्ञे
समुपदधदमोघं मोदमासादयेऽद्य ॥


सर्वा पाणिनिसूत्रसिद्धिगदिताऽस्मिन्नाटके प्रस्फुटम्
छात्रैर्वृत्तिविनिर्मितिश्च विहिता नीतिश्च सामाजिकी।
धातुप्रत्ययतोऽपि रूपरचनारीतिः शुभा दर्शिता
वैशिष्ट्यं मुनिपाणिनेः पथि गतं संदृश्यतामादरात् ॥

शाश्वतिकस्थलसंकेत :-
डी० ५६|३१ 'केशरिकुञ्ज' सिगरा
वाराणसी

दि० १५-१-१९६६ ई०

निवेदक :-
श्रीगोपालशास्त्री (दर्शनकेशरी)
प्रधानाचार्य :-
[श्रीबदरीनाथ वेदवेदाङ्ग महाविद्यालय]
जोशीमठ, चमोली।





नाटक-परिचयः

१—प्रथमं प्रस्तावनादृश्यम्:—अत्र महामहिम्नो भगवतो माहात्म्यं नान्दीपाठेन दर्शयन् पाणिनीय-पद्धतेर्ह्रासकालो व्यतीतोऽधुना तूदयकालः प्राप्त इति सूचितम्। ततश्च व्याकरणाध्ययनस्य सारल्य-साधने प्रवृत्तानां विदुषां नामकथन-प्रसङ्गेन नाटककर्तुः कवेरपि परिचयो विहितः। तत्रैव बालक-बालिकानां स्रग्विणीछन्दसो गानप्रसङ्गेन नाटकपात्रप्रवेशोऽवतारितः।

२—द्वितीयं सूत्रवृत्तिनिर्माणदृश्यम्:—अत्र बालिकाः सर्वाः श्रीशान्तानन्दस्वामिपृष्टाः स्रग्विणीच्छन्दोनिबद्धं सूत्रवृत्तिनिर्माणं परस्परं गानेन पद्यार्थकरणेन च बोधयन्तीति वृत्तिनिर्माणं ज्ञातुकामैरध्येयं दृश्यमिदमिति नाटकरूपे निबद्धम्।

३—तृतीयं वृत्तिनिर्माणोदाहरणदृश्यम्:—इह छात्रद्वयं सूत्रेभ्योऽनुवृत्त्यधिकारादिकं संग्राहं संग्राहं सूत्रवृत्तिनिर्माणं दर्शयति। यतः सूत्रवृत्तिनिर्माणमध्येतॄणामात्मसादनायासेनैव जायते।

४—चतुर्थमुत्सर्गापवादन्यायदृश्यम्:—अत्र छात्रद्वयं सूत्राण्येव गुटिकाप्रतीकानि कृत्वा शतरञ्जक्रीडां दर्शयति। येन प्रयोगसाधनप्रक्रिया साक्षादधिगता भवति पठितॄणाम्। प्रसङ्गतश्च सूत्राणां पूर्वापरीभावज्ञानं पदज्ञानं च स्वयं विशदायते!

५—पञ्चमं सूत्रभेदप्रदर्शन-दृश्यम्:—अत्र छात्रद्वयं परस्परं संलपत् संज्ञापरिभाषादि-सूत्रभेदान् अधिकार-सूत्राणाम् अवधिं न्यायाधीश (विधिभेद-) सूत्राणां स्वरूपं च सूचयति। यतश्चाध्येतारो व्याकरणमर्मज्ञा जायन्ते।

६—न्यायाधीशकार्यप्रदर्शनं षष्ठं दृश्यम्:—इह समाजव्यवहारेऽभियोगालय-दृश्याभिनयप्रदर्शनेन पाठकानां समाजशिक्षया सह व्याकरणरहस्यस्य स्फुटा

प्रतीतिर्जायते। अतश्च पूर्वदृश्यनिबद्धमपीदमत्यन्तोपयोगित्वादत्रोदाहरण-प्रदर्शनेन स्फुटीकृतम्।

७—सप्तमं स्थान-प्रयत्नदृश्यम्:—इह हि साक्षाच्छिक्षाकलया वैज्ञानिकेन विधिना स्थानयत्नादिबोधः क्रियते। अतश्च अनायासतः स्थानयत्नादिज्ञानमुपार्जयितुकामैर्दृश्यमिदमध्येयं प्रशिक्षणकलयाऽभिनेयञ्च।

८—अष्टमं सन्धि-शिक्षादृश्यम्:—इह हि पञ्चचामरच्छन्दसाऽच्सन्धिज्ञानं निबद्धमस्ति। एकोऽन्तेवासी छन्दोगानं कृत्वा तदर्थं करोति अपरश्च तदन्तर्गतसन्धिसूत्राणां पाणिनिपद्धत्याऽर्थं करोति इति 'एकक्रियार्थद्वयकृत्प्रसिद्धा' इति न्यायेनाऽच्सन्धिना सहैव सूत्रार्थज्ञानमपि जायते।

९—नवमं विसर्ग-सन्धि-दृश्यम्:—तत्र पूर्ववदेव एकश्छन्दोगानेन सह तदर्थं करोति। अपरश्च तदन्तर्गत-सूत्रार्थं पाणिनिपद्धत्या करोति। विसर्गसन्धिज्ञानम् एतद्दृश्याध्यायिनां वामहस्तकृत्यं जायते।

१०—दशमं हल्सन्धिदृश्यम्:—अत्रापि तद्वदेव-च्छन्दोगानेन सहार्थकरणं पश्चादपरेण च्छात्रेण तदन्तर्गतसूत्राणां पाणिनिपद्धत्याऽर्थकरणमिति साधुप्रकारोऽयं सन्धिशिक्षाया इत्यवश्यमध्येयोनि सन्धिदृश्यानि अभिनेयानि च।

११—एकादशमवशिष्टसन्धिदृश्यम्:—अत्रानुस्वारपरसवर्ण-कृत्यं तथैव च्छन्दोगानेनार्थकरणेन तदन्तर्गतसूत्राणां च पाणिनिपद्धत्याऽर्थज्ञापनेन विशदीकृतमस्ति। अपवाद-सन्धयोऽपि तथैव सूचिताः।

१२—द्वादशं सर्वसन्ध्युपसंहारदृश्यम्:—इह तु स्रग्विणीच्छन्दसा सर्वसन्धिनिष्कर्षो विनैव सूत्राणि केवलं स्थानप्रयत्नाभ्यामेव प्रदर्श्यंते। हास्यरसप्रयोगादध्येतृणां कौतुकावहमिदं दृश्यम्। व्यवहार-ज्ञानेन सहैव सन्धिज्ञानं करोतीत्यनायासमध्येयं दृश्यमिदम्।

१३—त्रयोदशं-समासशिक्षकं दृश्यम्:—अत्र समासानां नाम्नैव तत्तत्समासविशेषाणां विग्रहः पूर्वं पद्यैः पश्चाच्च गद्यैः कृतोऽस्ति। अस्याध्ययनेन

च्छात्राणां समासशिक्षा हस्तगता भवति। अवसाने प्रत्याहारादिसंज्ञानां सार्थकता तच्छब्दविग्रहेण प्रदर्शितास्ति।

१४—चतुर्दशं चतुर्दशरत्नबोधकं दृश्यम्ः—अत्र हि स्त्रीसमादरः पूर्वं पाणिनि-कृतः सूचितोऽस्ति। ततश्च पाणिनिमुनिनिबद्धं वैशिष्ट्यं चतुर्दशरत्नतया लक्षितं विद्यते। दृश्यस्यास्याध्येताऽनायासेनैव सर्वमपि मुनिनिबद्धं वैशिष्ट्यं विज्ञातुं शक्नोति।

१५—पञ्चदशं पाणिनीयप्रबोधग्रन्थदृश्यम्ः—इह दृश्ये एतन्नाटक-भिन्नस्य पाणिनीयप्रबोध-ग्रन्थस्याऽध्ययन-फलं स्वानुभूतं नाटकपात्रैर्विवृतमस्ति। स हि ग्रन्थः स्वर्गीयमहामुनि-मदनमोहनमालवीय-प्रेरणया विरचित इति तत्पुत्रेणैव गोविन्दमालवीयेन सूचितमस्ति।

१६—षोडशं सिद्धिसप्तकबोधकदृश्यम्ः—तत्र पूर्वं पूर्वदृश्यगत-चतुर्दशरत्नेभ्यः सिद्धिरत्नस्यैव सप्तभेदान् प्रदर्श्य तत्रापि सुबन्ततिङन्त-सिद्धी एव प्राधान्यं भजत इति दर्शितम्। तत्रैव प्रसङ्गतः पाणिनिनये रूपावतारसिद्धान्त-कौमुदीवत् प्रयोगसिद्धि-कृते ग्रन्थान्तर-निर्माणस्य नास्ति प्रयोजनमिति सयुक्तिप्रमाणं सूचितमस्ति।

१७—सप्तदशं तिङन्तसिद्धिदृश्यम्ः—अत्र लकारभेदेन प्रत्ययभेदान् प्रकल्प्य विकरणभेदतः सार्वधातुकलकारेषु स्वयं रूपाणि चालयितुं शक्यन्ते। तादृगेवेह प्रकारः प्रदर्शितः। छात्रद्वयं चाभिनीय रूपचालनं शिक्षयति दृश्येऽस्मिन्।

१८—अष्टादशं षडर्द्धधातुकलकार-दृश्यम्ः—अत्र दृश्ये सर्वेषामार्द्धधातुकलकाराणां प्रत्ययेषु धातुरूपाणि अनायासेनैव चालयितुं शक्यन्त इति विकरणभेदतः सेडनिड्भेदत्रिधया प्रदर्शितम्। अत्रशिष्टसिद्धयोऽपि नाम-धातु-सन्नन्तादिप्रक्रियाः कृदन्त-तद्धितान्तादि-शब्दानां दर्शिताः।


इत्येवं सर्वमावश्यकं वृत्तमभिधायावसाने नाटकग्रन्थस्य स्वरूपसिद्धये लिपि-सौष्ठवं विधाय मुद्रणप्रयोगं कुर्वतो न्यायव्याकरणाचार्य-श्रीगौरवनाथ-पाण्डेयस्य

तथा न्यायशास्त्राध्यायिनस्तदीय-शिष्यस्य श्रीजयप्रकाशकन्नौजिनश्छात्रस्य चोपकारं बिभर्मि। याभ्यां पुस्तक-पाण्डुलिपिं परिष्कृत्य पुस्तकं मुद्रापण-क्षमं कृतम्। तदनु सर्वात्मना संशोध्य प्रकाशनकलयाञ्चितं विधाय शुद्धतममिदं नाटकं प्रकाशयतेऽस्माकं परमसुहृदे श्रीगौरीनाथपाठकाय साहित्याचार्य्यायानेकशो धन्यवादाः। संस्कृतज्ञं कम्पोजिटरं नियोज्य संशोधनप्रयासं ह्रासयते मुद्रापकाय श्रीमते पं० सत्यनारायण-"खण्डूड़ी"-साहित्याचार्य्याय भूयांसो धन्यवादाः। सर्वान्ते तमन्तर्यामिणं स्तौमि यो हि नाटक-रूपेणापि पाणिनीयप्रबोधं पुस्तकं विरचयितुं मह्यं शक्तिमदात्। सहि भगवान्—

युगे युगे योऽवततार गोपितुं
लीलाभुवं स्वःममराभिवन्दिताम्।
तां व्याकृतिञ्चोद्धरताद् बुधाकृतिः
कुरीतिमग्नां मुनिमार्गतश्च्युताम्॥

श्रीगोपालशास्त्री (दर्शनकेशरी)
प्र० आचार्य्यः--श्री ब. वे. वे. महाविद्यालयस्य
ज्योतिर्मठस्थस्य
सौर० १-१-२०२२ वै०

———



भूमिका

पूर्वैर्मुनीन्द्रैः किल बालबोधे न्यायः प्रदिष्टो गुडजिह्विकाह्वः।
नाट्यप्रयोगाल्लघुबालपाठ्यो ग्रन्थो निबद्धो मृदुशाब्दिकोऽतः॥

उदयनाचार्य्यो हि नैयायिको महताडम्बरेण ह्रासवादमेव विवृतवान्।

"जन्म-संस्कार-विद्यादेः शक्तेः स्वाध्याय-कर्मणोः।
ह्रास-दर्शनतो ह्रासः सम्प्रदायस्य मीयताम्"॥

(इति न्या० कुसु०)

महाकविरश्वघोषो बुद्धचरितकाव्ये यदृच्छा-विकाशवादं प्रख्यापयति--

यद्राजशास्त्रं भृगुरङ्गिरा वा न चक्रतुर्वंशकरावृषी तौ।
तयोः सुतौ तौ च प्रणिन्यतुस्तत्कालेन शुक्रश्च बृहस्पतिश्च॥
यच्च द्विजत्वं कुशिको न लेभे, तत्साधनं सूनुरवाप राजन्।
तस्मात्प्रमाणं न वयो न कालः कश्चित् क्वचिच्छ्रैष्ठ्यमुपैति लोके॥

राज्ञामृषीणां च हितानि तानि कृतानि पुत्रैरकृतानि पूर्वैः।

इत्यादयः शाब्दिका अपि यथोत्तरं मुनीनां प्रामाण्यमिति विकाशवादमेव प्रशंसन्ति, इत्येवं परस्परं जायमाने विविध-विबुध विचारभेदे पाणिनि-मुनिरपि विकाशपक्षमाश्रित्यैव स्वपूर्वकाल-वर्तिनां माहेन्द्रापिशल्यादीनामतिविस्तृतमव्यवस्थितं व्याकरणं वैज्ञानिकेन विधिना परिष्कृत्य उत्सर्गापवादन्यायेन सूत्रक्रमेणानुषीव्य लघु चकार। तथाहि—

समुद्रवद् व्याकरणे महेश्वरे,
तदर्धकुम्भोद्धरणं वृहस्पतौ।
तद्भागभागाच्च शतं पुरन्दरे,
कुशाग्रविन्दूत्पतितं हि पाणिनौ॥

इति हि प्रशस्तिरस्ति पाणिनिव्याकरणस्य। वैदेशिका अपि विद्वांसः पाणिनेर्धातुपाठं सूत्रपाठं परिभाषापाठं गणपाठं लिङ्गानुशासनञ्च वीक्ष्य विमुग्धाः सन्तः सततं स्तुवन्ति तम्। इत्थं हि प्रथममतिविस्तृतम् ऊहापोहविरहितं माहेश्वरं प्रकृष्टप्रज्ञसाध्यं व्याकरणं वृहस्पतिः परिचस्कार। ततश्च महेन्द्रः कालक्रमात् तल्लघु संचस्कार। चन्द्रादयोऽपि किमपि परिचस्क्रुः स्वप्रतिभानुसारम्। अवसाने च "कृतानि पुत्रैरकृतानि पूर्वैः" इति विकास-पक्षं प्रपोषयन् पाणिनिर्मुनिः—

अल्पाक्षरमसन्दिग्धं सारवद्विश्वतो मुखम्।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः॥

इति सूत्रलक्षणान्वितानि चतुर्न्यूनचतुःसहस्रसूत्राणि संसृज्य पाणिनीयाष्टकम् अकालकं व्याकरणम् प्रणिनाय। यद्धि शब्दानुशासनम्, अष्टकम्, अष्टाध्यायीत्यादिनामभिर्लोके प्रख्यातम्। यन्निमित्तम्—

"अज्ञानान्धस्य लोकस्य ज्ञानाञ्जनशलाकया।
चक्षुरुन्मीलितं येन तस्मै पाणिनये नमः॥"

इत्येवं पाणिनिं प्रशंसन्ति बुधाः। तदुपरि वररुचि—परपर्य्यायः कात्यायनदेवोऽपि—

उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते।
तच्छास्त्रं वार्तिकं प्राहुर्वार्तिकज्ञा मनीषिणः॥

इति पाणिनि-सूत्राणामुपरि त्रिषष्टिविशिष्ट-शतत्रयोत्तरचतुःसहस्र-वार्तिकानां संग्रहं कृत्वा पाणिनीयाष्टकं पूर्णं चकार। ततश्च पतञ्जलिदेवः सूत्राणां वार्तिकानां च समन्वयं विदधत्—

सूत्रस्थं पदमादाय वाक्यैः सूत्रानुसारिभिः ।
स्व-पदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ॥

इति भाष्यलक्षण-विशिष्टषट्त्रिंशदाह्निकम् पातञ्जलं महाभाष्यं जग्रन्थ । इत्थं हि-"यथोत्तरं मुनीनां प्रामाण्यम्–" इति मान्यता-शालि त्रिमुनिव्याकरणं पाणिनीयम् इति लोके प्रसिद्धिं गतम् ।

इदं हि त्रिमुनिव्याकरणं पाणिनीयं पाणिनिकालादारभ्य अविच्छिन्नं लक्ष्य-लक्षणात्मकम् मेधावर्द्धकं सूत्रवृत्तिनिर्माणविधिना-सक्रममधीयानाः—

ङ्याप् प्रातिपदिकात् ४।१।१

स्वौजसमौट्छष्टाभ्यांभिस्ङेभ्यांभ्यस्ङसिभ्यांभ्यस्ङसोसाम्ङ्योस्सुप् ४।१।२

इति सूत्राधारं गणपाठस्थसूत्रान्तरस्थशब्दानां सर्वास्वपि कारकाकारकविभक्तिषु

भूवादयो धातवः १।३।१ सनाद्यन्ता धातवः ३।१।३२

इति धातुसंज्ञां कृत्वा पाणिनिधातुपाठस्थधातूनां सूत्रान्तरोपात्तानां च धातूनां

तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्-
वहिमहिङ् ३।४।७८

इति सूत्राधारं सर्वाणि रूपाणि साधयन्तः सर्वेऽपि अन्तेवासिनो महावैयाकरणा भवन्ति स्म । तदनु कियतः कालस्य पश्चात् जयादित्य-वामन-विरचितकाशिका-धारेण ततोऽप्यग्रे जिनेन्द्रबुद्धिविरचितन्यास-साहाय्येन कालक्रमेण च माधवीयां धातुवृत्तिमपि च अधीयते स्म, तदापि सुबन्तसिद्धौ ग्रन्थान्तरं न दृश्यते । भाष्यञ्च सर्वत्र सर्वदा सर्वथा पूर्णताधायकं गण्यते स्म ।

तस्मिन्नपि समये इदं त्रिमुनिव्याकरणमनेनैव क्रमेण बहुकालावधि-अध्ययना-ध्यापने जागरूकं पाणिनि-पद्धतित एव समेधमानमासीत् । येन पूर्वं केवलमष्टाध्या-

-यात्मकशब्दानुशासनाधारम् अनायासत एव, कियतः कालतः पश्चाच्च काशिका-महाभाष्याध्ययनेन महावैयाकरणत्वं लभ्यते स्म। इत्थं हि वर्षत्रयेणैव ज्ञातपद-पदार्थसाराः सर्वतन्त्र-स्वतन्त्रा विचक्षणा विद्वांसः प्राचीना वैयाकरणा भवन्ति स्म। तदानीं नामाख्यातप्रयोगाणां साधनाय पृथक् ग्रन्थो न लभ्यते स्म।

ततः कियतः कालानन्तरं विधर्म्मशासने धर्म-कीर्ति-नामा महाबौद्धपण्डितः पाणिनेः केवलं लौकिकसूत्राणामेव संग्रहेण रूपावतारनामकं लघु पुस्तकं लक्ष्यप्रधानं चकार। ततस्तु-पाणिनि-पद्धतिनिरुद्धआया अक्रमा तदीया पद्धतिः प्रसृता जाता। यद्यपि पुरुषोत्तम-देवेनापि पाणिनेर्वैदिक-सूत्रत्यागेन केवल-लौकिक-सूत्र-संग्रहेणैव पुरुषोत्तमवृत्तिनाम्ना प्राचीनपद्धतिग एव लघुग्रन्थः पूर्वं निर्मितोऽभूत्। परन्तु तेन पाणिनिप्रक्रिया न विनष्टा आसीत्। तथैव पाणिनि-विन्यस्त-क्रमेणैव सूत्रघोषणं ततो वृत्तिनिर्माणं ततश्च सुबन्ततिङन्तयोः स्वयमेवोहापोहेन प्रयोगसिद्धिः पाणिनिदिशैव चलति स्म तत्र वैदिकसम्प्रदाये। केवलं बौद्धसम्प्रदाये तु रूपावतार-प्रक्रियाप्रसारः प्रवर्द्धते स्म। धर्म-कीर्तिनापि अष्टाध्यायी-घोषणं न निषिद्धम्। तेनापि रूपावतारग्रन्थे समागतानां सूत्राणां संग्रहात्मकः कोऽपि लघुसूत्रसंग्रहग्रन्थः ऋजुपाणिनीयवन्निर्मितः स्यादिति मन्ये। ततश्च पुरुषोत्तमदेव-संगृहीत-सूत्राणां क्रमेण घोषणम्, ततस्तत्सूत्रक्रमेण सूत्रवृत्ति-निर्माणम् अङ्गीकृत्यापि प्रयोगसिद्धिस्तदीयग्रन्था-नुसारं प्रचालिताऽभूत्। तत्र कारणं बौद्धानां वेदसूत्राध्ययन-प्रयास-निवारण-मात्रम्, तस्मिन् काले तु केवलं बौद्धा एव रूपावताराधारेण पुरुषोत्तमवृत्तिग्रन्थाधारेण वा पाणिनीयं व्याकरणं पठन्ति स्म। अपरे तु सर्वेऽपि अष्टाध्यायीघोषणं कृत्वा सूत्रक्रमेण निर्मितवृत्तिकाः पूर्वमष्टकाधारं ततः काशिकाऽधारेण ततो माधवीयधातुवृत्त्याधा-रेण च पठित्वा भाष्यमधीत्य समधिक-संख्यायां पाणिनिपद्धत्यैव महावैयाकरणा भवन्ति स्म। इत्थमिमावुभावपि क्रमौ पाणिनेरधीतिनां मेधावर्द्धन-प्रकाररक्षकावे-वास्ताम्। यतो हि अष्टाध्यायीक्रमेण सूत्रघोषणं ततश्च स्वमेधा-वर्द्धक-सूत्रवृत्ति-निर्माणप्रथा तदापि प्रचलितैवासीदुभयत्रापि। केवलं प्रयोगसिद्धावेव विभे-दोऽभूदुभयोः।

इयं प्रथा तु रूपावतारानुकृत्या श्रीरामचन्द्रदीक्षित-विरचितायां प्रक्रिया-कौमुद्यां ततश्च तदनुकृत्या श्रीभट्टोजीदीक्षित-विरचितायां च सिद्धान्त-कौमुद्यां ततो-

प्यग्रे बहुकालानन्तरम् भट्टोजीदीक्षित-शिष्य-परम्परा-समुत्पन्नेन श्रीवरदराजभट्टेन निर्मितायां लघुकौमुद्यामपि प्रचलन्ती एवासीत्। केवलं वृटिशशासने समागत्याधुनिक-पण्डितानां प्रमादेन स्वयं सूत्र-वृत्तिनिर्माणप्रथा विच्छिन्ना जाता। तत्र नेमे रामचन्द्र-दीक्षितादयो दोषिणस्ते तु केवलं बौद्ध-धर्मकीर्तिप्रवर्तित-लक्ष्यानुसारप्रक्रियान्तरग्रन्थ-निर्माणमात्र-दोषिणः। स्वयं-सूत्रवृत्तिनिर्माण-प्रथायास्तु ते सर्वेऽपि समर्थका एवासन्। वरदराजस्तु स्फुटं वक्ति "सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयं सर्वत्र" इति।

प्रथेयं व्याकरणाऽध्यापकैराधुनिकैरालस्यात् स्वच्छात्राणां वृत्तिनिर्माणे साहाय्यदानप्रमादाच्च विलोपिता। ते हि छात्राणां स्वयं वृत्तिनिर्माणे साहाय्यमदत्त्वा सूत्राधोलिखितां वृत्तिमेव घोषितुं प्रेरयामासुः। अष्टाध्यायीघोषणमपि न्यषेधिषुः। सा हि वृत्तिस्तु ग्रन्थकृद्भिरेतदर्थं सूत्राधो दर्शिता यच्छात्रा अनया रीत्या वृत्तिं स्वयमस्य सूत्रस्य निर्मान्तु। किन्तु स्वाध्यापकप्रमादात् स्वालस्याच्च च्छात्राः सूत्राधो निर्दिष्टां वृत्तिं घोषितुमारब्धवन्तः, अध्यापकाश्च तस्याः वृत्तेः स्वमातृभाषायाम् अर्थं कारयित्वा सिद्धान्त-कौमुदीं लघुकौमुदीं पाठयितुं प्रवृत्ताः। इत्थं इयं वृत्तिघोषण-प्रथा रूढमूला जाता, स्वयं वृत्तिनिर्माणप्रथा सर्वथैव विच्छिन्ना जाता। अद्यत्वे तु कोऽपि जानात्यपि नो यत् का सा पाणिनिपद्धतिः। का साऽष्टाध्यायीति। साम्प्रतं रूढमूला प्रथेयं, यत् यः कोऽपि व्याकरणमधीते स पूर्वं कौमुदीं ससूत्रवृत्तिं लघुपूर्वां घोषं घोषं मातृभाषायामर्थमपि बालबुद्धित्वादभ्यस्यतु, तत एव प्रयोगसिद्धिमपि शुकवत् रटतु। सबोधं स्मरणन्तु साम्प्रतिकाध्ययनाध्यापन-पद्धतेः सर्वदा बहिष्कृतं विद्यते। अध्यापका अपि तथैवाध्यापयन्ति। सूत्राधो निर्दिष्टां वृत्तिं स्वमातृभाषायामनुवाद्य च्छात्रैः प्रयोगसिद्धिप्रकारमपि घोषयन्ति। किमन्यत् "अन्धेनैव नियमाना यथान्धाः" इति औपनिषदो न्यायः सर्वत्रैव विजृम्भितो दृश्यते।

यस्य फलमिदमेव सर्वत्रावलोक्यते यत् एतेन पाणिनिपद्धति-विलोमाध्वना तदीयं व्याकरणं पठन्तश्च च्छात्रा बुद्धिवर्द्धकं मेधा-सर्जकं द्विजत्व-निष्पादकं तदीयतपोबुद्धिप्रकर्ष-फलं स्वयं सूत्रवृत्तिनिर्माणं विहाय वृत्तिघोषणमात्रव्यापारेण बुद्धिकुण्ठता-स्मृतिशक्तिह्रासता-कूपमण्डूकताप्रभृतिसर्वमपि दोषमेवोपार्जयन्ति।

दूरं गच्छति पाणिनिमुनि-निबद्धशिक्षाकलासोपानाऽरोहणम्, । सूत्राणां पूर्वापरीभावज्ञानेन शतरङ्गक्रीडावत्, उत्सर्गापवादन्यायेन प्रयोग-सिद्धि-विधानम्, पदपदार्थज्ञानेन सहैव पाणिनिनिबद्धसमाजशास्त्र-परिशीलनम्, इत्यादि पाणिनिप्रतिभाप्रकर्षफलं सर्वमेव व्यर्थं गच्छति साम्प्रतम् ।

इदमेव साम्प्रतिकं सर्वं दोषजातं पाणिनि-व्याकरणाध्ययनेऽवलोक्य मयेदम् पाणिनीयप्रबोधाभिधं नाटकमभिनयात्मकं दृश्यकाव्यं व्यरचि । यत्र सर्वमपि पाणिनिमुनिप्रदर्शितं वैशिष्ट्यं विवरितुं प्रयत्नो विहितः ।

कथं तदीयं व्याकरणं परिशीलनीयं, के के च लभ्यन्ते विशिष्टाः गुणास्तदीयपद्धत्या तदीय-शब्दानुशासनाध्ययने । कश्च प्रकारः सर्वोत्तमः तद्व्याकरणाध्ययनस्य, किञ्च तदीयं वैशिष्ट्यम् । इत्यादि सर्वमपि समुपलब्धं स्यादस्य नाटकस्य परिशीलनात् ।

नाटकमुखेन व्याकरणाध्ययनं विवृण्वता मया शब्दशास्त्रस्य दुरूहतामपाकर्तुं सर्वथा विहितः प्रयत्नः । नाटकमिदमधीत्य च्छात्रैर्गुडजिह्विकान्यायेन सरलसाहित्याध्वना सर्वमपि सन्धिसमासशब्दरूपाद्यावश्यकज्ञानं द्रुतमेवासाद्यते । पाणिनिमुनिप्रकल्पितं वैशिष्ट्यमपि अन्यत्राप्राप्तमिहानायासत एवोपलब्धं स्यात् । सत्यवसरे च वार्षिकोत्सवादिषु नाटकस्यास्य कियतां दृश्यानामभिनयेन रङ्गस्थानां मनोविनोदोऽपि साधितः स्यात् । इति बहुफलोपलब्धिधिया नाटकरूपेऽभिनयात्मके निबद्धं व्याकरणं नटराजराजप्रसादात् समेधतां •सर्वदेति तदीयसेवायामभ्यर्थना । क्रमसूत्रततिप्रपाठकस्त्रिमुनिव्याकृतिवित्प्रवर्द्धताम्० इति हि भरतवाक्यम् । तत्र कियन्ति दृश्यानि, कानि २ च तानि । इति नाटकपरिचयप्रसङ्गेन पुरः प्रदर्श्यन्ते---

—: ० :—

* श्रीकृष्णःशरणं मम *

पाणिनीय-प्रबोध-नाटकम्

अथ प्रथमोऽङ्कः

नान्दी-पाठः

कोटीर्गा दददन्धकूपनिरये राजा नृगः पातितः
पित्राज्ञामवमत्य दैत्यतनयोऽप्युच्चैः पदं प्राप्तवान् ॥
योऽहिंसां जनतां व्यजिज्ञपदहो गान्धी हतो हिंसया ।
किं तत्त्वं परमेश्वराभिमतमित्याख्यातुमीष्टेऽत्र कः ॥

श्रुतिमपि गहनां तां शाखया प्रोद्दधार,
विविधमखिलतन्त्रं स्वात्मनाऽचिश्वकार ।
अवनिमवततार व्याकृतिर्यत्प्रभावात्,
सहि गिरिजनिजानिः पाणिनीयं प्रमृज्यात् ॥

महामुनिः पाणिनिरात्मचिन्तया,
व्यधाच्छिवं शाब्दिकशास्त्रमद्भुतम् ।
तदेव कालेन विलोमतां गतं,
विलोक्य खिन्नोऽहमिह ब्रवे किमु ॥

सूत्रधार :—अलमलमनर्गल-प्रलाप-कल्पनयाऽनल्पयानया जल्पनया, अरे शैलूषापसद ? कथं त्वं नपुंसकनरवद्विनिन्दित-विलापं विलपसि? न जानासि स्वतन्त्रे साम्प्रतिके भारते बहवो-विद्वद्धुरीणाः सहृदयाः सुधियः संस्कृतगिरं परिष्कर्तुं तदीयं रहस्यं रसयितुं तत्र सारल्यं च समानेतुं सर्वत्र संप्रवृत्ताः समवलोक्यन्ते। तत्रैव त्वमेवं क्लीबक्रन्दं क्रन्दसि ? (नेपथ्याभिमुखो भवन्) अये मारिष ? मारिष ? द्रुतमिहागम्यताम्।

मारिषः :—(प्रविश्य) एष, समागतोऽस्मि अयमहमागतोऽस्मि। कोऽस्ति नियोगो भावस्य, झटित्यभिधीयताम्, एष सन्नद्धोऽहं सर्वं संविधानं संविधातुम्।

सूत्र० :—(स्मयमानः) संविधानन्तु भारतीयं प्रथमराष्ट्रपतीनां सम्प्रति स्वर्गस्थानां डा० राजेन्द्रप्रसादवर्ममहोदयानां साभापत्ये संविहितमेवास्ति। नास्ति साम्प्रतम् संविधानान्तर-संविधानस्य प्रयोजनम्। केवलमस्य कापुरुषस्य कार्पण्यम् अपाकुरु। अयं वक्तुमेव नेच्छति। एतद्दुरुक्ति प्रथमम् आकर्ण्य ततस्तदुत्तरं ब्रूहि इति।

---

(१) भारतीयगणराज्यसंविधानसंकल्पः-वयं भारतीया मानवा भारतमेकं सम्पूर्णप्रभुत्वसम्पन्नं लोकतन्त्रात्मकं गणराज्यं निर्मातुं तथा तदीयान् समस्तान् नागरिकान् सामाजिकार्थिकराजनीतिकन्यायविचाराभिव्यक्तिविश्वासधर्मोपासनानां स्वतन्त्रतां प्रतिष्ठावसरयोश्च समतां प्रापयितुम्!

एवं तेषु सर्वेषु व्यक्तिगरिम्णो राष्ट्रैकतायाश्च सुनिश्चयकारिणीं बन्धुतां वर्द्धयितुम् दृढसंकल्पतः स्वस्यामस्यां संविधानसभायां अनेन विधिना संविधानमिदमङ्गीकृतमधिनियमितमात्मार्पितञ्च कुर्मः। (२६ जनवरी सन् १९५० ई०)
[अधः अध्यक्षादिसर्व सदस्यानां हस्ताक्षराणि सन्ति]

मारिषः --का दुरुक्तिरेतदीया ?

सूत्रधारः --(नान्दीपाठान्तिमं पद्यं अनुवदति)

महामुनिः पाणिनिरात्मचिन्तया,
व्यधाच्छित्रं शाब्दिकशास्त्रमद्भुतम् ।
तदेव कालेन विलोमतां गतं,
विलोक्य खिन्नोऽहमिह ब्रुवे किमु ।

इति हि दुरुक्तिरेतस्यावसीयताम् ।

मारिष :—आः क एवमाह 'विलोक्य खिन्नोऽहमिह ब्रुवे किमु । खेदावहनं हस्तोपरि हस्तं धृत्वा विलपनञ्च कापुरुषकर्म । उत्साहिनान्तु शृणोतु भवान्--

उत्साह-सम्पन्नमदीर्घ-सूत्रं,
क्रियाविधिज्ञं, व्यसनेष्वसक्तम् ।
शूरं कृतज्ञं दृढसौहृदञ्च,
लक्ष्मीः स्वयं याति निवासहेतोः ॥

सम्प्रति सहृदयाः समेऽपि सुधियः स्वतन्त्रेऽस्मिन् भारते युगानुरूपं संस्कृतभाषायाः सरलीकरणे तद्व्याकरणस्य च, विविधविधाने परिष्कारे च प्रवृत्ताः परिलक्ष्यन्ते । नास्ति कालोऽयं करुणक्रन्दनस्य ।

सूत्रधारः—मारिष ? कियतां विदुषां नामान्यपि एनं कापुरुषमाकर्ण-यितुम् अनुकम्पस्व तेनायं कार्पण्यम् अपाकृत्य अङ्गीकृतोत्साहोऽपाकृतकरुणाक्रन्दनोऽपि स्यादिति ।

मारिषः—आम् आम् शृणोतु अयम् भावश्चापि श्रवणीयमिदम् । प्रथमस्तु सार्वभौम-संस्कृत-प्रचारकः श्रीवासुदेवद्विवेदी (विनीतः) वेदशास्त्री साहित्याचार्य्यः । द्वितीयस्तस्य सनामा 'जयतु संस्कृतम्' इति संस्कृत-पत्रसम्पादको वासु-देवत्रिपाठी नयपालस्थः । तृतीयोऽ नेकग्रन्थप्रणेता काशीस्थः श्रीगौरीनाथपाठकः साहित्याचार्य्यः । चतुर्थो बालसंस्कृत-सम्पादको रामस्वरूपशास्त्री बम्बई मण्डलस्थः । पञ्चमो रामबालकशास्त्री गाण्डीव-सम्पादको वाराणसेयः । यथा षष्ठो नागपुरस्थः संस्कृत-भवितव्य-सम्पादकः सत्यनारायण-कुलकर्णी । सप्तमो दिल्लीनिवासी अखिलभारतवर्षीय-संस्कृत-साहित्य-सम्मेलनस्य महामन्त्री मण्डनमिश्रो रत्नाकर-सम्पादकः । अष्टमो विश्वज्योतिस्सम्पादको हुसियारपुर-साधुआश्रम-सञ्चालको विश्वबन्धु-शास्त्री । इत्यादयो बहवो विद्वांसो संस्कृतभाषा-प्रचारे तत्सरलीकरणे च व्यापृता विलोक्यन्ते ।

सूत्रधारः—मारिष ? त्वन्तु कुम्भकारपचने नादभाण्ड-विस्मृतिं विस्मरसि । अरे महामहाध्यापकं व्याख्यानवाग्मिनम् पण्डित-राजं गोपालशास्त्रिणं दर्शनकेशरिणं कथं विस्मरसि ?

मारिषः—अये भाव ! काशीपण्डितसभाध्यक्षस्य काँग्रेसान्दोलन-कालेवर्षं कारागारवासमध्यासीनस्य विलक्षण-विचक्षणस्य तस्याभ्यर्हिता विश्वविदिता ख्यातिरिति जानतैव नाभिहितं तदभिधेयं मया ।

सूत्रधारः—अस्तु शृणु तेनैव सुगृहीताभिधेयेन लोकोत्तरचरितेन पाणिनीयनारीजागरणादि-नाटकप्रणेत्रा प्रणीतं पाणिनीय-प्रवोधाभिधं नाटकमस्माभिरद्य प्रयोक्तव्यं येनैवम्भूतानां कापुरुषाणामपि संस्कृतमध्येतुमुत्साहः समृद्धः स्याद् । येन चान्येऽपि सर्वे तत्प्रतिज्ञानुसारं षट्सु मासेष्वेवानायासतः संस्कृतज्ञाः स्युरिति ।

मारिषः—का हि तस्य महापण्डितस्य प्रतिज्ञा मामपि श्रावयतु भावस्ताम्

सूत्रधारः—शृणु, सा तु सर्वंजनीना मदनमोहन-मालवीयप्रेरिता विश्वविदिता चास्ति ।

ऊर्ध्वबाहु प्रतिज्ञेयं कृता गोपालशास्त्रिणा ।
षण्मासस्यैव कालेन बालाः संस्कृत-वित्तमाः ॥

(नेपथ्ये ध्वनिं श्रुत्वा सर्वे उन्मुखा भवन्ति स्रग्विणी-छन्दसा गायतां बालानामन्तरङ्गे प्रवेशः)

सम्प्रघुष्य क्रमात्पाणिनीयाष्टकं,
सन्धिबोधात्पदच्छेदतोऽर्थं कुरु ।

सूत्रसूत्रं परस्मिन्समासञ्जयन्,
निर्विशेषां जहत्तद्विभक्तिं समाम्॥

(उभौ कर्णौ स्फारीकृत्य शृणुतस्तत्र मारिषो वक्ति)

मारिषः—भाव ? स्रग्विणी-गानमिव श्रूयते। कुत एतत्, किं निमित्तञ्चेति न ज्ञायते।

सूत्रधारः—अये तस्यैव विदुषः पाणिनीयप्रबोध नाटक-पात्राणि इमानि, स्व-स्व-भूमिकायां सूत्रवृत्ति-निर्माण-प्रकारं स्रग्विणी-छन्दसा निबद्धं गायन्तः प्रविशन्ति। अत आवामपसरावः

(इत्युभौ निष्क्रान्तौ)

प्रस्तावना-समाप्तिः। इत्येकं दृश्यम्।

—: ० :—

अथ द्वितीयं दृश्यम्

(ततो नानावेषभृतां गायतां नृत्यतां बालाभिः सह बालकानां प्रवेशः)

बाला बालकाश्च :—

सम्प्रघुष्य क्रमात्पाणिनीयाष्टकम् ,
सन्धिबोधात्पदच्छेदतोऽर्थं कुरु ।
पूर्वसूत्रं परस्मिन् समासज्जयन् ,
निर्विशेषां जहत्तद्विभक्तिं समाम् ॥
पूर्वसूत्रं परस्मिन् समासज्जदा-
स्वाधिकारावधिं शृङ्खलाबद्धितः ।
तत्समानं पदं स्वं जहद्वीतरत्,
सर्वमेवोपहारीकरोत्यादरात् ॥
किन्तु तत्रापि चेद्यद्विशेष्यादिकं,
तत्समानं पदं चापि याति स्वतः ।
इत्थमाविष्करोत्यर्थमत्यद्भुतं,
यो न जन्मावधि क्वापि विस्मर्य्यते ॥

स्वामी शान्तानन्दसरस्वती:—(प्रविश्य) यूयं किं गायथ ?

चारुवेक्षा प्रथमा :—वयं पाणिनि-मुनि-प्रक्रान्तं सूत्रवृत्ति-निर्माण-प्रकारं गायामः।

स्वामी—पुनर्गीयतां तस्यार्थोऽपि क्रियताम्।

द्वितीया :—(पुनस्तत्र प्रथमं पद्यं सम्पूर्णं गायति।) सम्प्रघुष्य क्रमादिति। (तदर्थं च करोति) शृणु अवधानदानपूर्वकम्, पद्यस्य अर्थस्तु अतिसरलोऽस्ति यथाहि—पाणिनीयाष्टकं पाणिनिमुनिप्रणीता-ष्टाध्यायीनिबद्धं शब्द-शास्त्रं अथवा ऋजुपाणिनीयं तत्संक्षिप्तसंस्करणं सम्प्रघुष्य सम्यक् सप्रकरणज्ञानं कण्ठस्थी-कृत्य सन्धिबोधात् सन्धिज्ञानं कृत्वा पदच्छेदतः सुबन्ततिङन्त-रूपभेदेन अर्थं सूत्रार्थं कुरु। किं कुर्वन् पूर्वसूत्रं परस्मिन् सूत्रे समासज्जयन् संलगयन्, कथं निर्विशेषां विशेषण-विशेष्यादि-भिन्नां तस्य उपरितनसूत्रस्य विभक्ति समां समानां त्यजन् इति सरलार्थः। निष्कर्षोऽयं भवति यत्-यस्य सूत्रस्य अर्थः कार्य्यः स्यात् तस्य सूत्रस्य उपरितनसूत्राणां विषमा विभ-क्तिर्ग्राह्या भवति समा तु सैव गृह्यते या विशेषणस्था विशेष्यस्था भवति इत्यलम्।

प्रथमा :—सखि ! त्वं तु स्वामिशान्तानन्दसरस्वतीपृष्टा मसृणं मनोहरं सम्यक् पद्यार्थं कृतवती, अग्रेतनस्यापि पद्यस्य अर्थं कुरु।

द्वितीया :—आम् आम्, मत्सखी अग्रेतनस्य पद्यस्यार्थं करिष्यति, (तामाकारयति) सखि विजये ! आयाहि।

'पूर्वसूत्रं परस्मिन्-समासज्जदा'

इत्यादि पद्यस्यार्थं कुरु, (इति कथयित्वा सा तत्रैव तिष्ठति)

विजया :—उपेत्य नृत्यन्ती सर्वं पद्यं पठति ।

'पूर्वसूत्रं परस्मिन्'-

इत्यादि । (स्थित्वा) सखि ! शृणु सरलार्थं-परस्मिन् अग्रिमे सूत्रे समासज्जद् संलगत् पूर्वसूत्रम् आस्वाधिकारावधि निजगन्त-व्यस्थानं यावत् शृंखलावृद्धितः शृंखलावृद्धिन्यायेन तत्समानं उत्तरसूत्रस्थपदतुल्यं स्वं पदं जहत् त्यजत् । इतरत् सर्वं विषमविभक्तिगं पदम् आदरात् सम्मानेन उपहारीकरोति समर्पयति इति सरलोऽर्थः ।

द्वितीया :—तवापि पद्यार्थ-कर्तृत्वशक्तिः साधीयसी । तृतीयपद्यस्यापि अर्थं शुश्रूषे ?

विजया :—सखि विमले ! आगच्छ । बोधय तृतीयपद्यार्थं भगिनीं विशदाम् (ततो बालिकावर्गतो विमलाख्या बालिका अग्रे समेत्य) शृणु भगिनि विशदे ! अहं तृतीयपद्यार्थं करोमि । (नृत्यन्ती तत्पद्यं सम्पूर्णं पठति) 'किन्तु तत्रापि चेद्०' इति ।

द्वितीया :—अहो ! कोकिलामपिस्वरे ह्रेपयसि । अस्तु, कुरु विशदार्थम् ।

विमला :—सखि ! त्वं स्वयं विशदासीति विशदमर्थं वाञ्छसि । अस्तु । अवधेहि, किन्तु तत्रापि पूर्वसूत्रेऽपि चेद् यदि यद् विशेष्यादिकं विशेष्यं वा विशेषणं वा पदं स्यात्, तत्समानम् एकविभक्तिगं पदमपि अग्रिमे सूत्रे स्वतः स्वैरं याति गच्छति, यतो हि-

'या विशेष्येषु दृश्यन्ते लिङ्गसंख्याविभक्तयः ।
प्रायस्ता एव कर्तव्याः समानार्थे विशेषणे ॥'

इति नियमात् तत्र विशेष्ये विशेषणे च समानैव विभक्ति तिष्ठति । अतस्तत्र समानविभक्तिकता बाधिका न भवति इत्थं पूर्वोक्तप्रकारेण पूर्वसूत्रं कर्तृ अद्भुतम् अर्थं आविष्करो उत्तर-सूत्रस्य । यः अर्थः जन्मावधि जन्मनः अवधि समा यस्मिन् कर्मणि तद् यथा तथा क्रियाविशेषणमिदम् । क कुत्राऽपि कथमपि न विस्मर्य्यते विस्मृतो न भवतीत्यर्थः इत्थं हि पाणिनिसूत्राणां क्रममहिमेत्यर्थः ।

विशदा :—सखि विमले । तव अनेन सूत्रार्थकरणेन पाणिनिसम्बन्धि ए पद्यं स्मृतिपथम् उपैति तत् त्वां श्रावयितुमिच्छामि ।

विमला :—अये श्रावय, निर्विचिकित्सम् श्रावय ।

विशदा :—अवहिता भव—

सूत्रवृत्तिं स्वयं कुर्य्युरध्यायिनः
पाठनस्य प्रकारोऽयमासीन्मुनेः ।
तद्विहन्त्री पठत्प्राणहन्त्री हृदा,
निष्क्रमा पाठरीति-द्रुतं हीयताम् ॥

सखि विमले ! पद्येऽस्मिन् मे दृढोऽधुना विश्वासो जातो पाणिनि-सूत्राणां छात्राभिः छात्रैर्वा स्वयम्-अर्थः का

[तावदपरा उपेत्य]

अपरा :—भगिन्यौ ममाप्येकं पद्यं श्रृणुतम् ।

उभे :—श्रावय मसृण-सुरागेण—

अपरा :—अहो वीणाक्वणितस्यापि विस्मरिष्यथः ।

क्रमोपबन्धेऽप्यथ लाघवे मुने –
स्तपःप्रकर्षप्रतिभापरिश्रमौ ।
विलोक्य मुग्धास्मि च वक्तुमक्षमा,
प्रशीलयन्त्यः प्रविदन्तु बालिकाः ॥

उभे :—सत्यं परिपुष्टघुष्टमप्यतुष्टिकृद्रागमिमं शृण्वतोः आवयोः

(अन्या कन्या संघान्निःसृत्य)

अन्या :—भगिन्यः परस्परं वाग्विनोदे व्यापृता यूयं सदनस्यापि स्मरथ नो वा ?

सर्वा :—बाढ़ं बाढ़ं, चलामो गृहम् चलामो गृहम् ।

(इति सर्वाः सर्वे च समेत्य गायन्ति) ।

आश्चलामश्चलामश्चलामो वयं
बालिका बालकाः स्मो महाकौतुकाः ।
तत्र पश्याम किं कुर्वते मातरो-
ऽस्माकमार्य्याः समे भ्रातरोऽध्यायिनः ॥

(इति सर्वे निष्क्रान्ताः)

द्वितीयं दृश्यं

समाप्तम्

—:०:—

अथ तृतीयदृश्यम्

(स्थानं-श्रीबदरीनाथ-वेदवेदाङ्ग महाविद्यालय-रङ्गशाला,
तत्र केशवदेवराडिनामानौ छात्रौ
परस्परं संलपतः)

केशवः--अयि देवराडिन् ! पूर्वम् सम्प्रघुष्येत्यादि-पद्यार्थं बोधयन्त्यो बालिकाः सूत्रार्थनिर्माण-प्रकारं तु विवृतवत्यः, परन्तु तदुदाहरणानि नादुः । किं त्वमेकमप्युदाहरणं दत्वा दर्शयिष्यसि सूत्रार्थम् ?

देवराड़ी—कथन्न दर्शयिष्यामि, अहन्तु सूत्रवृत्तिनिर्माणस्य पर्य्याप्तमुदाहरणं दास्यामि शृणु-क्ङिति च १।१।५ इति सूत्रस्य पदच्छेदः क्ङिति इति सप्तम्यन्तम् पदम्, अत्र ग् च क् च ङ् चेति कङः । ते इतः यस्य सः क्ङित् तस्मिन् क्ङिति अत्र न धातुलोप आर्द्धधातुके १।१।४ इत्यतः न इति इको गुणवृद्धी १।१।३ इति च सूत्रं सर्वम् आयाति । ततः क्ङिति इको गुणवृद्धी न भवत इति पदस्थितिः भवति । ततश्च द्वन्द्वान्ते श्रूयमाणं पदम् प्रत्येकमभिसम्बध्यते इति परिभाषया इत् शब्दस्य प्रत्येकं योगे क्ङिति इत्येतस्य निमित्तसप्तमीत्वात् निमित्ते इति च लब्धे षष्ठी स्थाने योगा १।१।४६ इति स्थाने लब्धे गितिकितिङिति निमित्ते इकः स्थाने गुणवृद्धी न भवत इत्यर्थः पर्य्यवस्यति, सूत्रार्थकरणस्योदाहरणम् अभून्नवा ? वद ।

केशव :—साधु सखे देवराडिन् ! साधु त्वं तु पण्डितोऽसि सम्यग् दर्शितं त्वया सूत्रार्थकरणपाण्डित्यं, किञ्च ममैकां शङ्कामपाकुरु तदा जाने ते पाण्डित्यम् ।

देवराड़ो :—का ते शङ्का ?

केशव :—अयि मित्र ! विग्रहे त्वं ग् च क् च ङ् चेति वर्णत्रयं वक्षि । उच्चारणं तु क्ङोरेव करोषि । इत्यत्र किं कारणम् ?

देवराड़ो :—अहो भ्रातस्त्वं सन्धिं न जानासि किम् ?

केशव :—कः सन्धिस्तत्र स्फुटं बोधय ?

देवराड़ो :—शृणु गकारस्य खरि च ८।४।५५ इति ककारे द्वितीयककारस्य जश्त्वेन गकारे तस्य च यरोऽनुनासिकेऽनुनासिको वा ८।४।४५ इति ङकारे हलो यमां यमि लोपः ८।४।६४ इति लोपे क् ङ् इति वर्णद्वयस्य स्थितिर्ज्ञेया ।

केशव :—सखे देवराडिन् ! त्वया समेधितोत्साहः । अहमपि सूत्रार्थं करोमि त्वं शृणु ।

देवराड़ो :—आम् आम्, अहं सन्नद्धोऽस्मि श्रोतुम् ।

केशवः :—सुपि च ७।३।१०२ इति सूत्रम् । पदच्छेदः—सुपि इति सप्तम्यन्तम् च इत्यव्ययम् । अस्योपरितनं सूत्रम् अतो दीर्घो यञि ७।३।१०१ इति सर्वमायाति । अङ्गस्य ६।४।१ इत्यधिकाराल्लब्धे अतोऽङ्गस्य दीर्घः यञि सुपि इत्यन्वये 'येन विधिस्तदन्तस्य १।१।७२ इति परिभाषा - सूत्रेण 'अतः' इत्यस्य 'अदन्तस्य' इति कृते 'यस्मिन् विधिस्तदादावल्ग्रहणे' इति परिभाषया यञि इत्यस्य 'यञादौ' इति कृते अदन्तस्य अङ्गस्य यञादौ सुपि दीर्घः स्याद् इत्यर्थो लभ्यते ।

देवराड़ो :—सखे केशव ! सूत्रमिदम् अङ्गाधिकारीयम् । संहिताधिकारीयस्य कस्यचन अर्थं कुरु तदाहं जाने ते पाण्डित्यम् ।

केशव :—कथय कथय कस्य संहिताधिकारस्थस्य षाष्ठस्य आष्टमस्य वा।

देवराड़ो :—क्रमशश्चल त्वं षाष्ठस्य कुरु अहम् आष्टमस्य सूत्रस्य करिष्यामि ।

केशव :—शृणु, आद्गुणः ६।१।८७ इति सूत्रम् । पदच्छेदः—आत् इति पञ्चम्यन्तम् गुण इति प्रथमान्तम् द्विपदमिदं सूत्रम् । अत्र संहितायाम् ६।१।७४ एकः पूर्वपरयोः ६।१।८४ इति च अधिक्रियेते । इको यणचि ६।७।७७ इत्यतः अचि इत्यनुवर्तते । षष्ठी स्थाने योगा १।१।४९ इति परिभाषासूत्रेण स्थाने लब्धे अवर्णाद् अचि परे संहितायां पूर्वपरयोः स्थाने एकः गुणः भवति । इति सूत्रार्थः सम्पद्यते ।

देवराड़ो :—साधु सखे ! साधु सम्यग् विवृतः त्वया सूत्रार्थः । इदानीं ममाष्टमस्य संहिताधिकारस्थस्य सूत्रस्य अर्थं शृणु—

केशव :—कथय कथय सन्नद्धोऽस्मि श्रोतुम् ।

देवराड़ो :—वाऽवसाने ८।४।५६ इति सूत्रम् । पदच्छेदः-वा इत्यव्ययम् अवसाने इति सप्तम्यन्तम् । द्विपदमिदं सूत्रम् । अत्र तयोर्य्वावचि संहितायाम् ८।२।१०८ इत्यतः संहितायाम् इति अध्यायान्तमधिक्रियते । अभ्यासे चर्च ८।४।४५ इत्यतः चरिति झलां जश् झशि ८।४।५३ इत्यतः झलाम् इति पदद्वयमनुवर्तते तथा च संहितायाम् अवसाने च विषये झलां वा चर्

स्यात् । इति सूत्रार्थः स्वयं सिद्धो भवति । कथय सम्प्रति जाता ते तृप्तिः । एकस्य उदाहरणस्य कृते त्वं गर्धसे अत्र उदाहरणसंहतिर्जाता ।

केशव :--सखे देवराडिन् ! सूत्रार्थकरणपाण्डित्ये तु त्वमसि पटुतर इति ज्ञातं मया । किन्तु सर्वं पाण्डित्यं तवैव पार्श्वे पिण्डितं नास्ति । पश्य लक्ष्मीप्रसादः शम्भुसत्ती चेति उभौ अपि महापण्डितौ नैयायिकौ शतरङ्ग-क्रीडां कर्तुम् उद्यतौ इत एव प्रसर्पत इति ताभ्यामप्यवसरो देयः । अत आवामपसरावः ।

इति निष्क्रान्तौ

तृतीयं दृश्यं

समाप्तम् ।

—:०:—

अथ चतुर्थं दृश्यम्

(ततो लक्ष्मीप्रसादशम्भुसतिनौ प्रविश्य परस्परं संलपतः)

लक्ष्मीप्रसादः :- किं भो नैयायिक ! व्याकरणे शतरङ्गक्रीड़ा त्वया क्रीड़िता न वा ?

शम्भुसती :--कथन्न, अधीतव्याकरणकाव्यकोषः अनधीतन्यायशास्त्रो बाल इति तर्कसंग्रहपाठकालेऽस्माभिर्घुष्यते । ततोऽपि **'पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः'** इति कारिका-व्याख्याने प्रथमं वैयाकरणानां पदज्ञानमुपतिष्ठते ततोऽस्माकं नैयायिकानामिति तत्रापि व्याकरणज्ञानमावश्यकम् । तच्च पदज्ञानपूर्वकमेव भवतीति प्रथमपरीक्षायां वयं तत्कुर्मः । तत्रैव व्याकरण-पदज्ञानावसरे शतरङ्गक्रीड़ा क्रीड्यते । सा तु त्वयापि क्रीडितैवास्ति, कथं निगूहसे ।

लक्ष्मी० :—नहि नहि नाहं निगूहे । अत एव तु तां क्रीडितुमद्य समुद्यतोऽस्मि । किन्तु त्वया इदं किम् उपक्षिप्तम् यत्प्रथमं वैयाकरणानां पदज्ञानमुपतिष्ठते ततोऽस्माकं नैयायिकानामिति किमस्माकं नैयायिकानामन्यत्पदज्ञानं वैयाकरणानां तेषामन्यदिति ?

शम्भु :--अथ किं वैयाकरणानां सुप्तिङन्तं पदम् १।४।१३ इति सुबन्तं तिङन्तं पदमुच्यते । यथा रामः इत्येकं पदम् । अस्माकं नैयायिकानां तु शक्तं पदम् । शक्तिविशिष्टं पदम् निगद्यते ।

यथा रामः इत्यत्र राम इत्येकं पदं, सु इत्यपरम् पदम् । इत्येवं पदद्वयम् । इत्थं महान् भेदोऽस्माकं तैः सह ।

लक्ष्मी०—अहं तु भेदमिमं नाज्ञासिषम् अद्य त्वत्प्रसादात् ज्ञातवानिति धन्यवादास्तुभ्यम् ।

शम्भु :—नास्ति धन्यवादप्रयोजनम् । वस्तुस्थितिरियम् इति कर्तव्य-पालनं मम । अस्तु सम्प्रति शतरङ्गक्रीडामारभस्व ।

लक्ष्मी०—तर्हि कथय-'रामौ' इत्यस्य कथं सिद्धिः ।

शम्भु० :—(स्मयमानः) अहो पाणिनिमुनेर्विलक्षणेयं शतरङ्गक्रीडा । अस्तु चल चल-राम + औ इति स्थिते, अहं प्रथमां गुटिकाँ आद्गुणः ६।१।८७ इति सूत्रं चालयामि । संहिताविषये अव-र्णादचि परे पूर्वपरयोः स्थाने एको गुणो भवति । इत्यर्थतः मकाराकारस्य पूर्वस्य औकारस्य च परस्य स्थाने एको गुण ओकारो भवतु इतीयं मे प्रथमा गुटिका, वद त्वम् अत्र किं करोषि ?

लक्ष्मी०—भ्रातः ! तव प्रथमा गुटिका मम द्वितीयया गुटिकया विप्रतिषेधे परं कार्य्यम् १।४।२ इति परेण वृद्धिरेचि ६।१।८८ इति सूत्रेण विहन्यते । अवर्णादिचि परे संहितायां विषये पूर्वपरयोः स्थाने एका वृद्धिः स्यादित्यर्थतः मकाराकारस्य पूर्वस्य औकारस्य च परस्य एक औकारो वृद्धिः भवतु । इतीयं मे द्वितीया गुटिका । चल अग्रे किं चलसि ।

शम्भु :—अयि भ्रातः ! तवेयं द्वितीया गुटिका मम प्रथमयोः पूर्वसवर्णः ६।१।१०२ इति सूत्रेण वृद्धिरेचीत्यतोऽपि परेण तृतीयया गुटिकया विहन्यते । अकः प्रथमयोः अचि परे संहिता-

विषये पूर्वपरयोः स्थाने एकः पूर्वसवर्णो दीर्घः स्यादित्यर्थतः मकाराकारस्य पूर्वस्य औकारस्य च परस्य स्थाने एकः पूर्व सवर्णो दीर्घ आकारोभवतु इतीयं मे तृतीया गुटिका, चल अग्रे किं चलसि ।

लक्ष्मी० :—अयि सखे ! पश्य तवेयं तृतीया गुटिका मया नादिचि ६।१।१०३ इति निषेधसूत्रेण परेण तुरीयया गुटिकया निषिध्यते । अवर्णादिचि परे संहितायां विषये पूर्वपरयोः स्थाने पूर्वसवर्णदीर्घो न स्यादित्यर्थतः मकाराकारस्य पूर्वस्य औकारस्य च परस्य इचः स्थाने पूर्वसवर्णदीर्घनिषेधे मम सैव द्वितीया गुटिका 'वृद्धिरेचि' इति सूत्रम् उपतिष्ठते । इत्येवं चतुर्थी गुटिका मे विजयिनी जाता । त्वं सखे अस्यां क्रीड़ायाम् आत्मानं विजितं विजानीहि इत्यलम् ।

शम्भु० :—तर्हि स्थान-परिवर्तनेन पुनर्द्वितीया क्रीड़ा भवतु ।

लक्ष्मी० :—बाढ़म् बाढ़म् (इति स्थान-परिवर्तनं कृत्वा तिष्ठतः)

शम्भु० :—अयि सखे लक्ष्मीप्रसाद ! अहं आद्गुण इति सूत्रस्य अर्थं पाणिनिपद्धत्या न कृतवान् त्वं तमाचर पूर्वम् । ततोऽहमग्रेतनस्यार्थं करिष्यामि ।

लक्ष्मी० :—शृणु सखे ! इदन्तु मे वामहस्तकृत्यम् । परन्तु पूर्वं देवराड़िना अस्य सूत्रस्य पाणिनि पद्धत्या अर्थः कृतो विद्यते । इत्यहं तमेवार्थं ते पुरः स्थापयामि । त्वं स्वसूत्रस्य तृतीय-गुटिकारूपस्य प्रथमयोः पूर्वसवर्णः ६।१।१०२ इत्यस्य अर्थं पाणिनिपद्धत्या कुरु ।

शम्भु० :—अयि सखे ! किं त्वं मां पाणिनि-पद्धतेः अनभिज्ञं प्रकल्पयसि । शृणु, सूत्रमिदं तत्रैव प्रकरणे विद्यते । इत्यतः संहितायाम् ६।१।७२ इति । एकः पूर्वपरयोः ६।१।८४ इति च अधिक्रियेते । 'इको यणचि' ६।१।७७ इत्यतः अचि इति अकः सवर्णे दीर्घः ६।१।१०१ इति सूत्रतः अकः इति दीर्घः इति च पदद्वयमनुवर्तते, तथा च अकः परयोः प्रथमाद्वितीययोः अचि-परे संहितायां विषये पूर्वपरयोः स्थाने एकः पूर्वसवर्णः दीर्घः स्याद् इति अर्थः पाणिनिपद्धत्या सम्पद्यते, वद सम्प्रति संजातस्ते सन्तोषः ?

लक्ष्मी० :—सन्तोषस्तु ममेदृशोऽभूद् यत्तुभ्यं शतशो धन्यवादान् ददामि । केवलमेकलं प्रश्नं मे यदि समुत्तरेः ।

शम्भु० :—पृच्छ सखे ! यथेच्छं पृच्छ न किमपि निगूहस्व निजमनोरथम् ।

लक्ष्मी० :—अयि सखे ! यत्त्वम् अकः सवर्णे दीर्घः ६।१।१०१ इत्यतः अकः इति दीर्घः इति पदद्वयमानयसि सवर्णे इति सप्तम्यन्तं कथं नानयसि ।

शम्भु० :—अहो भ्रातर्नैयायिकोऽपि सन्नेवं विस्मरसि । नियमे—

"निर्विशेषां जहत्तद्विभक्तिं समाम्"

इति समविभक्तेस्त्यागो विहितोऽस्ति तर्हि अत्र 'प्रथमयोः' अचि' इति सप्तम्यन्ते पदे विद्यमाने कथं 'सवर्णे' इति सप्तम्यन्तम् आगच्छेत् । त्वमेव बुद्ध्या विचारय ।

लक्ष्मी०—यद्येवं तर्हि कथमत्र 'पूर्वसवर्णः' इति प्रथमान्ते विद्यमानेऽपि 'दीर्घः' इति प्रथमान्तमानीतवान् तद्वद ।

शम्भु०—अयि सखे ! धूलिप्रक्षेपं न कुरु । तत्रापि 'निर्विशेषां' इति 'समायाः' विशेषणं विद्यते । विशेषण-विशेष्य-विरहितां समाम् जहद् इत्यर्थः । इत्येवं स्थिते दीर्घ इति प्रथमान्तं समममपि 'पूर्वसवर्णः' इत्यस्य विशेष्यं पदमस्ति । अतस्तत्र समत्वं बाधकं न भवति । विशेषणाभावाद् विशिष्टाभावः 'इति नैयायिकनियममेव अत्रापि स्मर' इत्यलम्

लक्ष्मी०—साधु सखे साधु अधुना तु विजयश्रीः त्वामेव विजयस्रजं परिधापयति । प्रमुद्यतां विजयश्रिया । इति धन्यवादशतेन विभूषयन् भवन्तं समापयामि क्रीडामिमाम् ।

शम्भु०—साधु साधु क्रीडा तु स्वल्पैव साधीयसीति विरमामो वयम् अन्यौ अपि जयप्रकाश-कन्नौजिजयवल्लभ-जोशी च शास्त्रयुद्धार्थं सन्नद्धौ स्तः । इति ताभ्यामप्यवसरो लभ्यते ।

(इति निष्क्रान्ताः सर्वे)

चतुर्थदृश्यं

समाप्तम् ।

—:०:—

अथ पञ्चमं दृश्यम्

(स्थानं श्रीबदरीनाथवेदवेदाङ्गमहाविद्यालयः। जयप्रकाश
कन्नौजी जयवल्लभजोशी च परस्परं संलपतः।
तत्र जयप्रकाशकन्नौजी वक्ति)

जयप्रकाश कन्नौजीः—किं भो जयवल्लभ ! त्वन्तु सर्वं पाणिनीयाष्टकं जिह्वाग्रमेव कृतवानसि। अतश्च कतिविधानि सूत्राणि भवन्ति। सूत्राणाञ्च तेषां कीदृशोऽस्ति विभागः? मूर्द्धाभिषिक्ताधिकारसूत्राणि च कानि? इति संक्षेपात् मां बोधय।

जयवल्लभः—साधु कन्नौजिन्! साधु, मम मनोऽनुकूलोऽयं ते प्रश्नः, क्रमेण तदुत्तराणि सावधानमनाः शृणु। तत्रप्रथमं सूत्रभेदो यथा-

संज्ञा च परिभाषा च विधिर्नियम एव च।
अतिदेशोऽधिकारश्च निषेधश्चेति सप्तधा॥

ज० प्र० कनौजी—तेषां विभागमपि बोधय विबुधवर!

जयवल्लभ—तमपि ब्रवीमि सावधानः शृणु।

संज्ञा च परिभाषा च प्रथमाध्याय-गोचरा।
समासाश्च विभक्त्यर्था द्वितीयाध्याय-गोचराः॥
तृतीयाध्यायगाः सर्वे धातुतः प्रत्यया मताः।
तुर्ये पञ्चमके चैव शब्दतस्ते प्रकीर्तिताः॥

षष्ठे प्रकृति-कार्य्याणि द्वित्वसन्धिस्वरादिभिः ।
अलुगादिविधानानि पूर्वप्रकृतिगानि हि ॥
अङ्गाधिकारस्तुर्य्याङ्घ्रेः सप्तमान्तमुदीर्यते ।
सप्तमे प्रत्ययादेशस्ततो द्विष्ठमिडादिकम् ॥
गुणवृद्धी तृतीयेऽङ्घ्रौ तुर्ये चाभ्यासकृत्यकम् ।
अष्टमे पदकार्याणि संहिताधिकृतिस्तथा ॥
षत्वणत्वादिकं सर्वं त्रिपादी-कार्यमेव च ।
विशेषतस्तु वै बोध्यं त्वया पाणिनिनाटके ॥

ज० प्र० कन्नौजी :—नास्ति मे तृप्तिरेतावता विशेषतोऽधिकारान् बोधय त्वम् ।

जयवल्लभ :—अस्तु, सूत्रार्थावगतौ प्राधान्यमधिकाराणामिति ममाप्युत्साहस्तेषां बोधने । प्रथमं वृद्धिगुणौ ततः प्रगृह्यम्, सर्वनामसंज्ञेति प्रथमाध्यायस्य प्रथमपादे । ङित्कितौ तत एकशेषो द्वितीयाङ्घ्रौ । तृतीय-पादे प्रथममिदधिकारः । आत्मनेपद-परस्मैपदे ततः । तुर्य्यपादे प्रथमम् एकसंज्ञाधिकारो द्वितीयाध्यायस्य द्वितीयपादान्तं याति । कारकनिपातकर्मप्रवचनीयाश्च क्रमेणेति प्रथमाध्यायः ।

ज० प्र० कन्नौजी :—अये सखे जयवल्लभ ! सत्यम् त्वमधिकाराधिकारी असि । सर्वं समुद्गिर संक्षेपात् ।

जयवल्लभ :—द्वितीयाध्याये द्वितीयपादान्तं समासाधिकारः । तन्मध्येऽव्ययीभावतत्पुरुषद्विगुनञ्बहुव्रीहिद्वन्द्वा इति अवान्तराधिकारा

इमें । तृतीयपादे पादान्तमनभिहिताधिकारः । तुर्ये पादे एकवचनाधिकारः । नपुंसकार्द्धधातुकलुगधिकाराश्च क्रमेण ।

ज० प्र० कन्नौजी —साधु सखे ! साधु चलसि । चलाग्रेऽपि ।

जयवल्लभः—ततस्तृतीयेऽध्याये प्रत्ययः ३।१।१ परश्च ३।१।२ इति सूत्रयोः पञ्चमाध्यायान्तमधिकारः । धातोः ३।१।९१ कृदतिङ् ३।१।९३ तृतीयाध्यायस्य तुर्यपादान्तमधिकारोऽनयोः सूत्रयोः । कृत्याः ३।१।९५ इत्यस्य ण्वुल्तृचौ ३।१।१३३ इत्यतः प्राक् । भूते ३।२।८४ इत्यस्य वर्तमाने लट् ३।२।१२३ इत्यतः प्राक्— भविष्यति गम्यादयः ३।३।३ इत्यस्य पदरुजविशस्पृशो घञ् ३।३।१५ इत्यतः प्रागधिकारौ ।

ज० प्र० कन्नौजो—तुर्य्याध्यायाधिकाराः के इति संक्षेपात् उच्यतां सखे

जयवल्लभः—तत्र ङ्याप्प्रातिपदिकात् ४।१।१ इत्यस्य पञ्चमाध्यायान्तम् । स्त्रियाम् ४।१।३ इत्यस्य समर्थानां प्रथमाद्वा ४।१।८२ इति यावदधिकारः ।

कन्नौजो—ततस्ततः ।

जयवल्लभः—ततस्तु तद्धिताः ४।१।७६ इति अधिकारसूत्रादारभ्य समासान्ताः ५।४।६८ इत्यधिकारसूत्रान्तं तु अधिकारप्रवाहश्चलति प्रत्ययानामर्थानाञ्च । ते तु तत एव ज्ञेयाः । समासान्ताः ५।४।६८ इत्यधिकारः पादान्तं याति । षष्ठाध्यायस्य प्रथमपादे एकाचो द्वे प्रथमस्य ६।१।१ अजादेर्द्वितीयस्य ६।१।२ इत्यनयोरधिकारः ष्यङः सम्प्रसारणं पुत्रपत्योस्तत्पुरुषे ६।१।१३ इत्यतः प्राग्याति । सम्प्रसारणाधिकारश्च विभाषा परेः ६।१।४४ इति यावद् याति । संहितायाम्

६।१।७२ इत्यस्य अनुदात्तं पदमेकवर्जम् ६।१।१५८ इत्यतः प्राक् अधिकारः। एकः पूर्वपरयोः ६।१।८४ इत्यस्य ऋतउत् ६।१।१११ इति यावदधिकारः। तदनन्तरम् सुट्कात् पूर्वः ६।१।१३५ इत्यस्य कुस्तुम्बुरूणि जातिः ६।१।१४३ इत्यतः प्राक्। सुटइत्यस्यतु पारस्करप्रभृतीनि च संज्ञायाम् ६।१।१५७ इति यावदधिकारः। ततस्तु अनुदात्तं पदमेकवर्जम् ६।१।१५८ इत्यतो द्वितीयपादान्तं वैदिक-स्वर-साम्राज्यम्। तृतीयपादे अलुगुत्तरपदे ६।३।१ इत्यस्य अलुगिति प्राग् आनङ् ऋतो द्वन्द्वे ६।३।२५ इत्यतो याति। उत्तरपदे इति पादान्तमेति। ढ्रलोपे पूर्वस्य दीर्घोऽणः ६।।१११ इत्यतो दीर्घाधिकारः छ्वोः शूडनुनासिके च ६।४।१९ इत्यतः प्रागुपैति। अङ्गस्य ६।४।१ अधिकारोऽयम् सप्तमाध्यायान्तमेति। भस्य ६।४।१२९ इति पादान्तमुपसर्पति।

कन्नौजी––सखे वल्लभ ! समागतस्त्वमुपान्तम् किञ्चिदेवावशिष्यते त्वरस्वाधुना।

जयवल्लभः—सप्तमाध्यायस्य प्रथमपादे अतो भिस ऐस् ७।१।९ इत्यतः अत इति पञ्चम्यन्तम् जसःशी ७।१।१७ इति यावद्याति। युष्मदस्मद्भ्यां ङसोऽश् ७।१।२७ इत्यस्य युस्मदस्मद्भ्यामिति पदम् साम आकम् ७।१।३३ इति यावद् गच्छति। इदितो नुम् धातोः ७।१।५८ इत्यतो नुम् इति पदम् दिव औत् ७।१।८४ इत्यतः प्राग्गच्छति। द्वितीयपादे वृद्धिरनिडिड्युष्मदस्मदोर्मपर्यन्तस्येत्यादयोऽधिकाराः। तृतीयेऽपि वृद्ध्यादयोऽधिकाराः। चतुर्थे णौ चङ्युपधाया ह्रस्वः ७।४।१ इति

ह्रस्वपदम् सूत्रत्रयावधि—अत्र लोपोऽभ्यासस्य ७।४।५८ इति अभ्यासस्येति पदम् पादान्तम् अधिकृते वद्ये।

कन्नौजी—अष्टमाध्यायगानपि अधिकारान् संक्षिप सखे द्रुतम्।

जयवल्लभः—आम् आम, अष्टमाध्याये प्रथमम् सर्वस्य द्वे ८।१।१ इत्यस्य पदस्य ८।१।१६ इत्यतः प्रागधिकारः। पदस्येति च इडाया वा ८।३।५४ इत्यतोऽर्वाग् याति। पदात् ८।१।१७ इति सूत्रम सगतिरपि तिङ् ८।१।६८। इति यावद्याति द्वितीयपादे तयोर्य्वावचि संहितायाम् ८।२।१०८ इत्यतः संहितायाम् इति पदम् अध्यायान्तं याति। तृतीयपादे अपदान्तस्य मूर्द्धन्यः ८।३।५५ इति सूत्रम् पादान्तं याति। चतुर्थपादे च रषाभ्यां नो णः समानपदे ८।४।१ इति णत्वाधिकारः क्षुभ्नादिषु ८।४।३९ इति यावज्ज्ञेयः। त्रिपाद्याम् पूर्वत्रासिद्धम् ८।२।१ इत्यस्य साम्राज्यम्। तद्धि स्वस्थाने अतिदिशदग्रेऽपि अध्यायान्तम् अधिकुर्वदतिदिशति। इत्येवमतिसंक्षेपेणापि अधिकारनिर्देशे भूयान् समयस्ते मया गृहीत इति क्षन्तव्यम्।

कन्नौजी—सखे! समयस्तु बहुर्व्यपगत इति सत्यम्। किन्तु महोपयोगिनो विषयस्य ज्ञानं जातमिति धन्यवादास्पदम् त्वम्। अस्तु सम्प्रति मथुरामनोडिनोरवसरोऽस्तीति वयमपसरामः।

(मथुरा-मनोडिनौ रङ्गमञ्चे संलपतः ततोऽपसृतयोस्तयोः)

मथुराः—सखे मनोडिन्! आवयोः प्राक्तनौ सुहृदौ तु पाणिनेरधिकारान् विवृतवन्तौ। आवां न्यायाधीशसूत्राणि सूचयावः।

मनोडी—बाढं बाढम् त्वं सावधानः शृणु, अहं न्यायाधीशान् निर्दिशामि इह पाणिनिप्रक्रियायाम् चत्वारो न्यायाधीशाः प्रख्याताः

सन्ति । तत्र त्रयः पुमांस एका च स्त्री परिभाषारूपिणी प्रथमौ द्वौ उच्चोच्चतरौ स्त्री चोच्चतमा चरमश्चतुर्थो विच क्षणविलक्षणः । तृतीयेयम् न्यायाधीशा स्त्री प्राक्तनयोर्द्वयोर् निर्णयं न्यक्कृत्य स्वीयं निर्णयमुन्नततमं करोति । चतुर्थेन नास्ति संघर्षः कस्यापि । तत्स्वरूपमग्रे स्फुटं स्यादित्यलम्

मथुराः—केवलं नामसंकीर्तनेन किं भवति । स्वरूपमपि तेषां विवृ तदा जाने ते पाण्डित्यम् ।

मनोडो—अयिभ्रातर्मथुराः त्वम् ! अधीरः कथं भवसि। शृणु क्रमाद्वि वृणोमि तदपि। विप्रतिषेधे परं कार्य्यम् १।४।२ इति अयं प्रथमो न्यायाधीशो निम्नन्यायालये प्रारम्भतः सपादसप्ता ऽध्यायान्तं (प्रथमाध्यायप्रथमपादतः आरभ्य अष्टमाध्यायस्य प्रथमपादान्त-सूत्राणां) परस्पर-विवादे परसूत्राय विजयप्र निर्णयं ददाति । अत एवायं तृतीयश्रेणिग उच्चन्यायाधीशो गण्यते । द्वितीयो न्यायाधीशः पूर्वत्रासिद्धम् ८।२।१ इति। अयं हि न्यायाधीशः तत उच्चतरन्यायालये प्रथमाध्यायप्रथम पादत आरभ्य सपाद-सप्ताध्यायान्तसूत्रैः सह त्रिपादीसूत्राणां विवादे तथा त्रिपादी-सूत्राणाञ्च परस्परं विवादे पूर्वसूत्राय विजयप्रद-निर्णयं ददातीति अधिकदेशाधिपत्यात् उच्चतर श्रेणिगो द्वितीयो न्यायाधीश उच्यते । तृतीया परनि त्यान्तरङ्गापवादानाम् उत्तरोत्तरं बलीय इति परिभाषास्वरूपा स्त्री न्यायाधीशा उच्चतमश्रेणिगा कथ्यते । यतो हीयं ताभ्या मुभाभ्यामपि दत्तं निर्णयमन्यथा करोति । इत्यधिकदेशव्यापिनी तयोर्मातृस्वरूपा सर्वोच्चन्यायाधीशा प्रथमश्रेणिगा गण्यते । इति श्रुतं त्वया सर्वम् ?

मथुराः—आम् आम् ! सर्वं तु श्रुतम्, परन्तु हस्ते न किमपि आगतम्। केवलं स्वरूपमात्रपरिज्ञानेन न किमपि भवति। तेषां कार्यकलापमपि तु दर्शयंश्चल।

मनोडी—अयि प्रिय सखे मथुराः ! त्वमधीरो न भव। अस्माकं नैयायिकानां प्रमाणज्ञानमेव प्रधानं कर्म। तत्तु सर्वं बोधयाम्येव परन्तु ज्ञानम् आत्मसमवेतमभून्न वेति ज्ञातुं मध्ये मया प्रश्नः कृतः। 'श्रुतं त्वया सर्वमिति।' अस्तु, शृणु सावधानः वेद + अध्ययनम्, नदी + इह। साधु + उत्सवः। पितृ + ऋणम्, इत्येतेषु प्रयोगेषु क्रमशः प्रवृत्ते आद्गुणः ६।१।८७ इति इको-यणचि ६।१।७७ इति सूत्रे विप्रतिषेधे परं कार्यम् १।४।२ इत्ययमेव न्यायाधीशोऽपाकृत्य परत्वात् अकः सवर्णे दीर्घः ६।१।१०१ इत्यस्य विजयमुद्घोषयति। एवं हि क + आस्ते इत्यत्र प्राप्तमपि अकः सवर्णे दीर्घः ६।१।१०१ इत्यनेन दीर्घम् पूर्वत्रासिद्धम् ८।२।१ इत्ययमेव न्यायाधीशः लोपः शाक-ल्यस्य ८।३।१९ इति सूत्रमसिद्धीकृत्य मध्ये यकारं प्रदर्शयन् निवारयति भव + अन्ति। इत्यत्र गुणं प्रबाध्य प्राप्तमपि-दीर्घम् तृतीया उच्चतमन्यायाधीशा एव अपवादत्वेन हेतुना अतो गुणे ६।१।९७ इति प्रवर्तयन्ती पररूपं विधाय्य भवन्तीति साधयति। जातोऽधुना सन्तोषस्ते ?

मथुराः—अयि सखे ! प्राप्तमपि कृत्यं त्यजन्नाग्रे गच्छेश्चेत्का ते हानिः

मनोडी—किं भ्रातः ! किं मया प्राप्तमपि कृत्यं त्यक्तम् ?

मथुराः—अपवादस्वरूपम् अप्रबोध्यैव कथम् 'अतो गुणे' इत्यस्यापवा-दस्य प्रवृत्तिं कारयसि ?

मनोडी—अहो भ्रातः ! साधु स्मारितवानसि । पश्य 'अतो गुणे' इ सूत्रम् अपदान्ताद् अतः गुणे परे पूर्वपरयोः स्थाने एकं परर करोति । तस्य तु अकारांशे क्वापि प्रवृत्तिर्न स्यात् । सर्वत्र तु अकः सवर्णे दीर्घः । इति सूत्रं धृतखड्गं तिष्ठति । अतश् निरवकाशो विधिरपवादः । इति नियमान्तर्गतत्वात् सर्वथ निरवकाशविधिरयम् अपवादतां गत्वा दीर्घं प्रबाधते ।

मथुराः—साधु ! मनोडिन् साधु ! विवृता त्वयाऽपवादता । साम्प्रत स्त्रियाः न्यायाधीशेषु प्राधान्यदाने मुनेः कोऽभिप्रायः? इ प्रबोधय—

मनोडी—अत्र किं विवेच्यम् सखे ! महर्षिः पाणिनिस्तु पुंशब्देभ्यः टा ङीब्-ऊङादिविधानेन स्त्रीणां गौरवं करोत्येव। इत्यतश्च पु पेक्षया स्त्रीणामभ्यर्हितत्वं सुतरां प्रतिष्ठितमिति न्यायाधीश पदेऽपि स एव तस्याभिप्रायोऽवसेयः ।

मथुराः—साधु सखे साधु ! विवृतं त्वया स्त्रीगौरवे महर्षितात्पर्य्यम् अधुनाऽवशिष्टं चरमं चतुर्थं न्यायाधीशं विवृणु—

मनोडी—सखे मथुराः, चतुर्थोऽयं न्यायाधीशो विलक्षणो विचक्षण इ न पूर्वं तैः सहोपदिष्टः । सम्प्रति शृणु सावधानमनाः— असिद्धवदत्राभात् ६।४।२२ इति हि सूत्रम् स्वस्थानादार आभात् भाधिकारावधि (षष्ठाध्यायस्य चतुर्थपादान्तिमसूत्र वधि) पूर्वकार्यं परकार्ये क्रियमाणेऽसिद्धवत् करोति ।

मथुराः—तर्हि किं वैलक्षण्यमेतस्येति विशदय मनाक्—

मनोडी—अहो !तदधुनापि अवशिष्यत एव । शृणु, शास्धातोः हि प्र नित्यत्वात् शाहौ ६।४।३५ इति सूत्रेण शासः शादेशे 'शा

इति जातेझलन्तत्वाभावादप्रवर्तमानं हुझल्भ्यो हेर्धिः ६।४।१०१ इति सूत्रम् असिद्धवदत्राभादेव शादेशस्य असिद्ध्या शास् इति झलन्तं दर्शयत् प्रवर्तयति। ततो हेर्धौ कृते शाधि इति सिध्यति तथा 'जहि' इत्यत्र हन् + हि इत्यवस्थायाम् अनुदात्तोपदेश० ६।४।३७ इति नलोपे हन्तेर्जः ६।४।३६ इति हस्य जादेशे कृते प्रवर्तमानम् अतो हेः ६।४।१०५ इति सूत्रम् 'असिद्धवदत्राभाद्' इत्यस्यैव प्रभावात् पूर्वं जादेशस्य ततश्च नलोपस्यासिद्ध्या हन् इति हलन्तं वीक्ष्य निवर्तते। इत्येवं 'शाधि' इति असम्पद्यमानं सम्पाद्य 'जहि' इति विक्रियमाणं संरक्ष्य 'अप्राप्तस्य प्रापणं योगः' प्राप्तस्य रक्षणं 'क्षेमः' इति श्रीकृष्णवद् योगक्षेममभिदधदिदं सूत्रं बहूपकरोति पदजगदिति सत्यं विलक्षणविचक्षणो न्यायाधीशोऽयम्।

मथुराः—बाढं सखे! बाढम् यथाऽयं न्यायाधीशोऽद्भुतस्तथैव त्वमपि महाद्भुत इति तुभ्यं भूयांसो धन्यवादाः।

मनोडो—अहो सखे! अस्माभिरन्येषां बहुसमयो गृहीत इति अपसरामो रङ्गस्थलादधुना। (सर्वे निर्गताः) जवनिकापात।

इति पञ्चमं दृश्यम्।

—:*:—

अथ षष्ठं दृश्यम्

(स्थानं स एव विद्यालयः, उभौ ज्योतिर्विदौ छात्रौ मदनमोहनरामसेवकौ परस्परं संलपन्तौ प्रविशतः । तत्र पूर्वं रामसेवको वक्ति)

रामसेवकः—अयि सखे मदनमोहन ! ह्यो जयवल्लभजयप्रकाशादिकौ परस्परं संलपन्तौ न्यायाधीशानां स्वरूपं कार्य्य-कलापञ्च यद्यपि सूचितवन्तौ तथापि त्वराकारणात् तेषां कार्य्यकलापादि तादृशं स्पष्टं नाभूत् । अतोऽद्य तेषां न्यायाधीशानां कार्य्यकलापं विशदयन्तो रङ्गस्थानां वैयाकरण-विदुषां तच्छात्राणां च उपकारं कुर्मः । अन्येषां च मनोविनोदमादध्म इति । विषयोऽयमतिगहनोऽस्ति । अतश्च भूयोऽभ्यासेन अस्माकं दृढताऽपि तज्ज्ञाने समीयादिति

मदनः—अये मित्र ! वैयाकरणानां न्यायाधीश-कार्य्यकलाप-चिन्तयाऽस्माकं ज्योतिर्विदां को लाभ इति किं जलताडनचिन्तयाऽनयेति विरम्यताम्

रामः—अयि भ्रातर्नैवं वद ।

'एके सत्पुरुषाः परार्थ-घटकाः स्वार्थं परित्यज्य ये ।
सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये ॥'

इत्यादि भर्तृहरि-पद्यं किं त्वया न श्रुतम्, अन्यच्चात्र परपूर्वादि-संख्या-ज्ञानस्यावश्यकस्य प्रयोजनं विद्यते । तत्र वय-

मेव गणकाः प्रभवामः । ते वैयाकरणास्तु पूर्वत एव गणित-ज्ञान-विरहिता भवन्ति । सम्प्रति द्वितीयोऽयं गण्डस्योपरि-विस्फोटकस्तेषां प्रस्फुटितो दृश्यते । यद् धर्मकीर्तिप्रभृति-पण्डित-पङ्क्तौ पतितास्ते निष्क्रमां पद्धतिमाश्रित्य पाणिनीयं व्याकरणं पठन्तः सूत्राणां पूर्वापरीभावमेव न जानन्ति । इत्यतोऽपि ते न्यायाधीशानां तेषां पूर्वापर-संख्याज्ञानमूलकं कार्य्यकलापं सूचयितुं नैव समर्था इत्यकामेनापि भवता परोपकारधिया तेषां कार्य्यं संसाध्यमेवेत्यलम् ।

मदनः—अहो यद्येवं तर्हि तु आवश्यकी मे प्रवृत्तिरत्र । यतोहिं सम्प्रति स्वतन्त्रे भारते परोपकारप्रवृत्तिप्रवर्द्धनं नितान्तमावश्यकम् ।

रामः—अन्यच्च भ्रातः ! गणकानामस्माकं पाणिनिसूत्राणां क्रमसंख्या-ज्ञानं हस्तगतं भवति 'एका क्रिया द्व्यर्थकरी प्रसिद्धा' इति-न्यायोऽपि चरितार्थो भवति ।

मदनः—बाढं बाढम्, मया तु सम्प्रति सर्वथा स्वीकृतमेव त्वदुक्तम् । किन्तु अभियोगं त्वमेव चालय ।

रामः—आम् आम् ! एषोऽहं चालयामि अभियोगम् । त्वं प्रतिवादिपक्षं प्रक्षालय (ततः प्रथमो न्यायाधीश आसन्दीमञ्चाद्यासन-सम्भृतेऽन्तर्जवनिके रङ्गमञ्चे जवनिकामुत्तोलयन् प्रविशति तत्रैव)

रामसेवकः—(प्रविश्य) अयि भो न्यायाधीशमहोदय ! रामेभ्य इत्यत्र राम + भ्यस् इति स्थितौ सुपि च ७।३।१०२ यञादौ सुपि अदन्ताङ्गस्य दीर्घः स्याद्, इति भकारे यञादौ परे अदन्तस्य रामस्य दीर्घे रुत्वे-विसर्गे च जाते रामाभ्य इति स्यात् कथं रामेभ्यः ! इति ?

मदनः—(उपस्थाय) अये न्यायाधीश महोदय ! ममापि शृणोतु भवान् अयम् सुपि 'च' इत्यनेन दीर्घं कर्तुं चलति । अहं बहुवचने झल्येत् ७।३।१०३ इति अग्रेतन-सूत्रेण बहुवचने झलादौ सुपि अदन्ताङ्गस्य एद्भवतीत्यर्थकेन रामेत्यत्र मकाराकारस्य एकारं कृत्वा रामेभ्यः । इति कर्तुं प्रवृत्तोऽस्मि । न्यायः कस्य पक्षेऽस्ति ? इति न्यायाधीशो भवानेव वदतु ।

न्यायाधीशः—(उत्थाय) भवन्तौ विवदमानौ मामुपेतौ, उभौ अपि भवन्तौ सप्तमाध्यायगौ, इत्येवं सति विप्रतिषेधे परं कार्य्यम् १।४। २ इति उभयोर्विवादे अहं परस्मै विजयं ददामीति राम + भ्यस् इत्यत्र 'सुपि च इत्यपेक्षया परस्य' बहुवचने झल्येत् इत्यस्यैव विजये, रामेभ्यस् इति जाते रुत्वे विसर्गे च रामेभ्य इत्येव भविष्यति, न तु रामाभ्य इति निर्णयः ।

(सर्वे तालिकां वादयन्तः 'विजयतां न्यायाधीशः' । इति उच्चैरुद्घोषयन्ति) (ततः पूर्वत्रासिद्धम् ८।२।१ इति न्यायाधीशे स्वासनं समुपविष्टे तयोरेव रामसेवक-मदनमोहनयोः प्रवेशः । न्यायाधीश आसन्द्यां समुपविष्टः । तौ मञ्च-पार्श्वयोर्दण्डायमानौ स्तः । मञ्चो न्यायाधीशाग्रेऽस्ति । रामसेवको न्यायाधीशं श्रावयति)

रामसेवकः—अयि न्यायाधीशमहोदय ! आवयोर्विवादे भवान् न्यायाधीशोऽस्ति अतश्च कृपयाऽभियोगश्रवणेनानुगृह्णातु नौ ।

न्यायाधीशः—साधु, शृणोम्यहं चालयतमभियोगम् ।

रामः—अयि सखे मदन ! पूर्व-विजयेन न दृप्यस्व हरे + इह । इह स्थले कुरु सपरिकरं सन्धिकार्य्यम्

मदनः—(उत्थित एव) हरे + इह इति स्थितौ एचोऽयवायावः ६।१।७८ (अचि संहितायाम्) इति एकारस्य अयादेशे हरय् + इह इति जाते लोपः शाकल्यस्य ८।३।१९ (पदान्तयोर्व्यों लोपः अशि शाकल्यस्य मते) इति सूत्रेण यलोपे हर + इह इति। पक्षे हरयिह इति चेत्येवं रूपद्वयं भवति

रामः—न्यायाधीशमहोदय ! श्रूयताम् हर + इह इत्येतस्य मदनस्य प्रयोगे अहं आद्गुणः ६।१।८८ (आद् अचि संहितायाम् पूर्वपरयोः स्थाने एकः गुणः भवति) इति सूत्रेण अकारेकारयोः एकं गुणं कृत्वा हरेह इति रूपं कर्तुमिच्छामि। भवान् किं निर्णयति

न्यायाधीशः—किं भवान् मे निर्णयं शुश्रूषते ?

रामः—आवाम् एतदर्थमेवागतौ स्वः।

न्यायाधीशः—तर्हि अयं मे निर्णयोऽस्ति, शृणुतम्। तथाहि-अहमेव पूर्वत्रासिद्धम् ८।२।१ सूत्रम् अस्मि (पूर्वत्र सपाद-सप्ताध्यायी-सूत्रेषु त्रिपादी-सूत्रम् असिद्धम् करोमि। इत्यतः हर + इह इति स्थितौ प्रवर्तमानम् षाष्ठं आद्गुणं वीक्ष्य लोपः शाकल्यस्य इति त्रिपादीस्थं सूत्रम् असिद्धं भूत्वा तत्र यकारं त्यजति। इत्येवं सति हरय् + इह इति स्थितौ किं कथं भवान् 'आद्गुण' इति प्रवर्तयति वदतु।

रामः—अहो न्यायाधीशमहोदय ? अहन्तु चकितोऽस्मि भवन्न्यायं वीक्ष्य नाहं समर्थः अधुना आद्गुणस्य प्रवर्तने यकारव्यवधानात्। अतो निवृत्तोऽस्मि भवते धन्यवादं ददत्।

मदनः—अयि सखे राम-सेवक ! न्यायाधीशस्ते स्ववर्गीयमेव सूत्रम-सिद्धीकृत्य वर्गीयान्तरं सूत्रं निरोधयन् तस्मै त्यागशिक्षां ददाति। इति न्यायाधीशोऽपि सन् लोकाय साधुत्यागं, शिक्षयति। इति प्रशंसनीयो मुनिः पाणिनिः। साधूक्तं केनापि पाणिनीय-प्रशंसायाम्।

समाज-शास्त्रावगतिर्भवेदित—
स्तथेतिहासादिनयादि शिक्ष्यते।
न केवलेयं पदसिद्धि-संहिता,
द्विजत्व-सम्पादनसञ्चिकाऽद्भुता॥

रामसेवकः—सखे मदन ! दृष्टस्त्वया द्वितीयो मे न्यायाधीशः। स हि सपाद-सप्ताध्याय्यपेक्षया त्रिपादीगानि सूत्राणि तु असिद्धय-त्येव किन्तु त्रिपाद्यामपि पूर्वं प्रति परम् असिद्धयति। इति सर्वथा 'विप्रतिषेधे परं कार्य्यम्' इत्यस्यायं विरोधी। यत्र स पूर्वापेक्षया परस्मै विजयं ददाति। तत्रैवायं न्यायाधीशः परापेक्षया पूर्वस्मै विजयं ददाति। इति वैलक्षण्यमेतस्य।

मदनः—अयि सखे ? रामसेवक ? त्वमेतावतैव चकितोऽसि एका परिभाषा स्त्री सर्वोच्चतम-श्रेणिगा न्यायाधीशाऽस्ति सा तु अन्विष्याऽन्विष्य दुर्बलेभ्य एव विजयं ददाति।

रामसेवकः—कथमेतत्स्यात्

मदनः—यदाऽभियोगं तत्र नेष्यसि तदा ज्ञास्यसि (ततः अन्तर्जवनिकं चलितुमुद्यतयोरन्तर्जवनिकोत्तोलनेन स्त्रीवेशभृत उच्चतमन्यायाधीशस्य आसन्दीमञ्चाद्युपवेशन-सामग्री-संवलितस्य उपविष्टस्यैव प्रवेशः)

रामः—एहि सखे मदन ! चलामः । न्यायाधीशा सर्वथा रिक्तैव दृश्यते । (इत्युभौ उपसर्पतः)

न्यायाधीशा —(उत्थाय) कथं भवन्तावत्र ?

मदनः—अभियोगमस्माकम् अत्रभवती शृणुयात् । इति वयं शरणं श्रीमतीं समुपेताः ।

न्याया०—श्रावयन्तु (इत्युपविशति)

मदनः—महाशये ! सः । इत्यादि प्रयोगेषु तद्+सु इति स्थिते त्यदादीनामः ७।२।१०२ (विभक्तौ) इति सूत्रेण अलोऽन्त्यस्य १।१।५२ इति सूत्र-साहाय्येन तदः दकारस्य अकारे कृते त+अ, इति स्थितौ । अहम् आद्गुणः ६।१।८७ (आद् अचि संहितायाम् पूर्वपरयोः स्थाने एकः गुणः) इति गुणं कर्तुमिच्छामि । (ततो रामसेवको वक्ति)

रामः—नहि महाशये कथं तत्र गुणप्रवृत्तिः परत्वाद् अहम् त+अ इति स्थितौ । अकः सवर्णे दीर्घः ६।१।१०१ (अकः सवर्णे अचि परे संहितायाम् विषये पूर्वपरयोः एकः दीर्घः) इति सूत्रेण दीर्घं करिष्यामि । (तावत् पटीक्षेपेण प्रविश्य भागवतसिंहो विष्टः)

भागवतः—नहि महाशये ! (द्वयोर्विवादे तृतीयस्य लाभः) इति नियमात् अहमत्र अतो गुणे ६।१।९७ (अपदान्तादतः गुणे परे पूर्वपरयोः एकम् पररूपम्) इति सूत्रेण पररूपं चिकीर्षामि । (इत्येवं विवदमानेषु तेषु न्यायाधीशोत्थाय वक्ति)

न्याया०—(उत्थाय) अहो ! श्रुतं मया भवतां सर्वेषां वक्तव्यम् । (क्रमशः स्थितान् प्रत्येकं निर्दिशन्ननुवदति) शृण्वन्तु सः तौ ते इत्यादिप्रयोगेषु त+अ सु इति स्थितौ भवान् गुणं चिकीर्षति ।

अयं दीर्घम्, अपरोऽयं तृतीयः पररूपम्। इत्येवं युष्माकं विवादः। तत्र मे निर्णयं श्रोतुकामाः समेताःस्थ।

सर्वेः—आम् आम् बाढं बाढम्।

न्याया०ः—तर्हि सावधानाः शृणुत। अहं तु दुर्बल-रक्षिकास्मि। सन्तोषिणां साहाय्यं करोमि। 'परनित्यान्तरङ्गापवादानाम् उत्तरोत्तरं बलीयः' इत्येव मे स्वरूपम्। इत्यतोऽहं भवत्सु अन्तिमाय अतिदुर्बलाय सन्तोषिणेऽल्पेच्छवे अतोगुणे ६।१।९७ इत्यस्मै विजयं ददामि। (इति भागवताय विजयध्वजचिह्नं ददाति सर्वे-विजयतां न्यायाधीशेति जयनादं कुर्वन्तः—करध्वनिं कुर्वन्ति)

मदनः—अये महाशये न्यायाधीशमतल्लिके! यदि समाज्ञा स्यात्तदा स्वशङ्कामपाचिकीर्षामि।

न्याया०ः—यथेच्छं पृच्छ।

मदन :—कथमयमतो गुणे इत्यस्य पक्षलो दुर्बल इति वयं जिज्ञासवः।

न्याया०—साधु साधु, साधु पृष्टं त्वया। तर्हि सावधानाः शृणुत। अतो गुणे तु अपदान्ताद् अकाराद् गुणे (अदेङ्) परे पररूपं करोति। इत्येवं सति अकारांशे त+अ सु, इति प्रभृतिषु स्थितेषु शतरि च पठ+अत् इत्यत्र; तिङन्ते च भव+अन्ति इत्यादि स्थले च यत्रैव प्रसक्तुमुपसर्पति। तत्रैव अकः सवर्णे दीर्घः। इति खड्गहस्तं तिष्ठति। तर्हि कथं तद् अकारांशे प्रसक्तं स्यादिति 'निरवकाशो विधिरपवादः' इति निरवकाशत्वादपवादतां विन्दते। ततश्चाहम् अपवादाय विजयचिन्हं ददामीति दृष्टमेव युष्माभिः।

सर्वे—धन्यवादा दुर्बल-पक्षपातिन्यै भवत्यै। इति वयं सर्वे यथागतं गच्छामः (अन्तर्जवनिकापातः। द्वौ मदन-भागवतौ बहिरङ्गस्थले समेत्य परस्परं संलपतः रामसेवकः सर्वथा गतः)

भागवतः—अयि सखे मदन! त्वं न्यायाधीशानां कं सर्वोत्तमं मन्यसे तन्मां बोधय।

मदनः—प्रिय मित्र भागवत! षाष्ठोऽसिद्धवदत्राभात् ६।४।२२ एव सर्वोत्तमो न्यायाधीश इति मे सिद्धान्तः।

भागवतः—तत्कथमिति दृष्टान्ततो माववबोधय।

मदनः—अहो अहं पाणिनिमुनेः कार्य्यार्थं सर्वदैव सन्नद्धस्तिष्ठामि शृणु यथाऽयं सर्वश्रेष्ठस्तथाहं बोधयामि।

भागवतः—सन्नद्धोऽहमाकर्णयितुम्।

मदनः—हन् धातोर्लोटि मध्यमपुरुषैकवचने हन्+हि इति स्थितौ अनुदात्तोपदेश० इति न लोपे हन्तेर्जः ६।४।३६ इत्यनेन हन्तेर्जादेशे जहि इति सिद्धौ अतो हेः ६।४।१०५ इति प्राप्तं हेर्लुकं निवारयितुम् अयमेव न्यायाधीशः प्रभवति। तथाहि असिद्धवदत्राभात् ६।४।२२ (अत्र षष्ठाध्याये चतुर्थपादे आभात् भाधिकारावधि पूर्वकार्यं परकार्ये कर्तव्ये असिद्धवद्भवति। इत्यर्थकस्य अस्यैव न्यायाधीशस्य प्रभावेण पूर्वं जातो जादेशो नलोपोऽपि च पश्चात् क्रियमाणे हेर्लुकि असिद्धवद्भूत्वा हन्+हि इत्येवं रूपं पुनरानयति। अतोऽकाराभावात् जहि इत्यत्र हेर्लुक् न भवति इति निष्कर्षम् विद्धि।

भागवतः—अहो अद्भुतोऽयं सिद्धासिद्धभावः। यत् पूर्वतः सिद्धमपि-पश्चादसिद्धं भवति। इति।

मदनः—अये पुनरपि प्रयोगान्तरेऽसिद्धवद्भाव शृणु ।

भागवतः—सावधानोऽस्मि श्रोतुम् ।

मदन :—शास् + हि इत्यत्र नित्यत्वात् शाहौ६। ४।३५ इत्यनेन शासः शादेशे कृते हुझल्भ्यो हेर्धिः ६।४।१०१ इत्यनेन हेर्धि-कर्तव्ये असिद्धवदत्राभात् इत्यनेनैव न्यायाधीशेन शादेशस्य असिद्धतया शास् इति स्वरूपं दर्शयित्वा हेर्धिः कार्य्यते ।

भागवतः—अहो ! अत्रापि सिद्धमेवासिद्धं भवति । इति अद्भुतं व्यसनमस्य न्यायाधीशस्य सिद्धकार्य्यस्य असिद्धीकरणे ।

मदनः—त्वं तु सिद्धासिद्धभावमेव वीक्ष्य विमुग्धोऽसि । उत्सर्गलक्षणस्य प्रवर्तनम्, अपवादलक्षणस्य निषेधनम् इत्येतदपि वैलक्षण्यमस्य पश्य ।

भागवतः—विना गुरुं कथं ज्ञानं स्यात् ?

मदनः—नास्ति गुरोः प्रयोजनम् । अवधेहि 'शाधि' इत्यत्र उत्सर्गम् अभवन्तं धिभावं भावयति । 'जहि' इत्यत्र अपवादं भवन्त-मपि लुकं निषेधति । इति उत्सर्गापवादयोर्वैपरीत्यकरणभावं चमत्कारमेतस्य निभालय अन्तस्तलं प्रविश्य ।

भागवतः—सत्यं सखे ! सत्यमयं विलक्षणो न्यायाधीशो भाति । शाधी-त्यस्य सिद्धिं करोतीति 'अप्राप्तस्य प्रापणं योगः ।' जहीत्यस्य विनाशाद्रक्षणं 'करोतीति प्राप्तस्य रक्षणं क्षेमः ।' इति योग-क्षेमकारित्वात् वस्तुतोऽयं सर्वोत्तम एव न्यायाधीशोऽस्तीति ते कथनं सत्यतरम् मन्ये ।

मदनः—सत्यतरं मन्यस्व आहो असत्यतमं मन्यस्व समयस्त्वया भूयात्

गृहीतः। द्रुतं प्रपलायस्व अधुना जगदीशनवनिनौ स्वभूमिकायामागच्छतः।

भागवतः—सखे मदन! मनोगतमविवक्षितं दुःखाकरोतीति दयस्वावशिष्टं श्रोतुम्।

मदनः—किन्तेऽविशष्टमधुनापि। द्रुतम् उद्गीर्य प्रपलायस्व 'समयं बहु गृह्णासि।' इति मे वचनमप्यवधारय।

भागवतः—अस्तु, नास्ति मे बहु वक्तव्यम्। केवलमेषां न्यायाधीशानां कृत्येन या मे गुरुपादानामुक्तिः स्फुरिताऽस्ति, तामेवोक्त्वा विरमामि।

मदनः—तर्हि तामवश्यं श्रावय, गुरूक्तिस्तु गौरवमेवानयति।

भागवतः—गुरुभिस्तु पाणिनीयप्रशस्तौ बहूनि बहूपयोगीनि पद्यानि समुपनिबद्धानि, ततोऽहं पद्यद्वयं त्वां श्रावयामि सावधानं शृणु।

न केवला व्याकरणस्य पुस्तिकाऽ
ष्टाध्यायिकेयं नयशास्त्रसञ्चिका।
इमामधीत्य पाठक एति पाटवं
सर्वत्र लोकव्यवहारमार्दवम्॥

अपि च—

भृगुणा सह पाणिनिर्मुनि-
द्विजवंशस्य बहूपकारकः ।
स निधिं भृगुसंहितामदात्
स हि सूत्र-क्रममद्भुतं ददौ । इति ।

मदनः—साधु सखे ! साधु त्वया तु प्रासङ्गिकमिदं पद्यद्वयम् अभिधाय न्यायाधीशानामेषां सर्वोऽपि परिश्रमः सफलितः, सर्वं च कृत्यं स्फुटीकृतम् । अहो ! अधुनाऽपसरावो रङ्गस्थलात्

(इति निर्गतो जवनिकापातः ।)

इति षष्ठं दृश्यं समाप्तम् ।

—:❀:—

अथ सप्तमं दृश्यम्

(तत्रैव छात्रावासे वैयाकरण-ज्योतिर्विदौ शिवानन्दवाशिष्ठ-गोविन्दडिमरिच्छात्रौ संमिल्य संलपतः)

गोविन्दः--अयि भो ! वैयाकरण-शिरोमणे वाशिष्ठ ! श्रूयते त्वं वैयाकरणच्छात्रेषु भूयान् प्रवीणोऽसि। तर्हि मां स्थान-प्रयत्नादिकं बोधय।

वाशिष्ठः—आम् आम् त्वमपि तु ज्योतिर्वित्सु विख्यातो विद्वानसि। तर्हि कथं न त्वां प्रबोधयिष्यामि। शृणु संक्षेपेण। (श्यामपटे लिखन्)

स्थान-प्रयत्न-यत्नाश्च प्राणाश्चेति बुधेलिमाः।
प्रत्याहार-प्रकारेण मातृका-विधया तथा ॥

प्रथमं पद्यमिदं सम्यग् अभ्यस्य ततोऽग्रे पञ्च प्रकोष्ठ-स्थानानि वाम-दक्षिण-भागक्रमेण च लिख। दक्षिणभागे च सर्वान्ते उपर्यधःक्रमेणैकैकं प्रकोष्ठं सर्वेषां नामोल्ले-खनायाऽवशेषय। ततः सर्वोपरि कण्ठः, तालु, ओष्ठौ, मूर्द्धा दन्ता इति लिख। तदधः क्रमेण स्वतन्त्र-स्वरान् अ इ उ ऋ लृ (अक्) इति स्थापय।

तदधः वर्गाः कु चु पु टु तु, इति क्रमेण। तदधः प्रथमप्रकोष्ठे विसर्गं लिखित्वाऽग्रे क्रमेण यणो लेख्याः। तदधः शलः

मध्यमप्रकोष्ठे चार्ध-विसर्गो लेख्यः । सर्वान्ते दक्षिण प्रकोष्ठे उपर्यधःक्रमेण नामानि सर्वेषां लेख्यानि इत्येवं चक्रं स्यात् । इत्यतोऽग्रे यथाऽहं वदामि तथ त्वं मामनुवद । कोष्ठस्थानामक्षराणामुपर्यधःक्रमेणेदृशं स्थितिर्भवति तथाहि । (१) अकुविसर्गहकाराणां कण्ठ (२) इचुयशानां तालु (३) उपुवोपध्मानीयानामोष्ठ (४) ऋटुरषाणां मूर्द्धा (५) लृतुलसानां दन्ताः । अतोऽ एषां वैशिष्ट्यमपि अभ्यसनीयम् । ञमङणनानां नासिका च । एदैतोः कण्ठतालु । ओदौतोः कण्ठोष्ठम् । वकारस्य दन्तोष्ठम् । जिह्वामूलीयस्य जिह्वामूलम् । नासिकाऽनु स्वारस्येति स्थानविवेकः ।

कण्ठः	तालु	ओष्ठम्	मूर्द्धा	दन्तः	स्थानानि
अ	इ	उ	ऋ	लृ	अकः
कु	चु	पु	टु	तु	वर्गाः
ः	य	व	र	ल	अन्तस्थाः
ह	श	⌣	ष	स	ऊष्माणः

गोविन्दः—अयि सखे ! त्वन्तु वैज्ञानिकेन विधिना स्थानं बोधयसि द्रुतमेव ज्ञानगम्यं भवति । एवमेव प्रयत्नादिकमपि बोध

वासिष्ठः—साधु ज्ञातं त्वया । अयमेव वैज्ञानिको विधिः पाठनस्य त्वयाऽप्येवमेवान्ये पाठ्याः । तत्र स्वयं तत्तन्मुखस्थान

उच्चारणं कृत्वा कृत्वा तत्तद्वर्णा वक्तव्याः। छात्राश्च स्वयं तत्तन्मुखस्थानतः तांस्तान् वर्णान् उच्चार्यैव बुध्येरन् न तु केवल-घोषणतः। यत्नोऽपि द्विधा आभ्यन्तरो बाह्यश्च। तत्राभ्यन्तरः प्रयत्न-शब्देन उच्यते। बाह्य एव यत्नशब्दभाग् भवति। तत्राद्यः पञ्चधा विवृतस्पृष्टेषत्स्पृष्टेषद् विवृतभेदात्, अचां (स्वराणां) विवृतः प्रयत्नः। ञयां (कादिमान्तानां स्पर्शानां) स्पृष्टः। यणाम् (अन्तस्थानाम्) ईषत्स्पृष्टः। शलाम् (ऊष्मणाम्) ईषद्विवृतः। ह्रस्वाकारस्य संवृतः। प्रक्रियादशायां तु विवृत एव। अचः स्वराः। कादयो माऽवसानाः ञयः स्पर्शाः। यरलवाः (यणः) अन्तस्थाः। श ष स हाः (शलः) ऊष्माणः,। अं अः इत्यचः परौ अनुस्वारविसर्गौ। स्वरोपरि विन्दुरेकोऽनुस्वारः, स्वरस्य पश्चात् विन्दुद्वयं विसर्गः। ≍क≍ख इति कखाभ्यां प्रागर्धविसर्गसदृशो जिह्वामूलीयः ≍प≍फ इति पफाभ्यां प्रागर्धविसर्गसदृश उपध्मानीयः।

गोविन्दः—भ्रातर्वसिष्ठ! तव पाठनप्रकारः साधीयान् विद्यते। श्यामपटे लिखन् पाठयसि। येन स्फुटं हृद्गतं जायते। अयं हि वैज्ञानिको विधिः पाठनस्य। इत्थं हि यत्नान् प्राणानपि पाठय।

वसिष्ठः—भ्रातर्गोविन्द! सावधानमनाः शृणु, प्राणा अपि यत्नभेदा एव कार्य्यवशात् पृथगुच्यन्ते। तत्रैकादशधा यत्नाः विवारः श्वासोऽघोषः। संवारो नादो घोषः। उदात्तोऽनुदात्तः स्वरितः। अल्पप्राणो महाप्राणश्चेति। तत्र खरो विवाराः श्वासा अघोषाः। हशः संवारा नादा घोषाः। अच उदात्ता

अनुदात्ताः स्वरिताः । वर्गाणां प्रथम-तृतीय-पञ्चमा यणश्चाल्पप्राणाः । वर्गाणां द्वितीयचतुर्थौ शलश्च महाप्राणाश्चेति । एषु उदात्तादिज्ञानन्तु पाणिनिसूत्रैर्ज्ञायते ।

गोविन्दः—अयि भो ! महावैयाकरण ! वासिष्ठ ! एषां स्थानादीनां कुत्रोपयोग इति न बोधितं त्वया ।

वासिष्ठः—इति तु त्वया स्वयमूहनीयम् । स्थानेऽन्तरतमः १।१।५० इति सूत्रप्रवृत्तये स्थानज्ञानमुपयोगि । तुल्यास्यप्रयत्नं सवर्णम् १।१।९ इति सवर्णसंज्ञोपयोगि स्थान-प्रयत्न-ज्ञानम् । हल्सन्धौ आन्तरतम्यपरीक्षायामुपयोगिनो भवन्ति यत्नप्राणाः । तथाहि पद्यम्—

प्राणयत्नाद्भवेत्तारतम्यज्ञता
यान्ति घोष्यं हशस्ते खरोऽघोषताम् ।
अल्पप्राणा यणो वर्गगा(१)ऽलोऽसमा
स्ते समाः शल्समेता महाप्राणिनः ॥

अहो सखे गोविन्द ! आवाभ्यामन्येभ्योऽपि समयो देयोऽस्ति । पश्य तौ रामेश्वरतूड़ि-विद्याधरजोशिनौ समयं प्रतीक्षेते इत्यावामपसरावः (इति निष्क्रान्तौ)

इति सप्तमं दृश्यम् ॥

---

(१) वर्गगाश्च ते अलः इति कर्मधारयः । वर्गगा वर्णा इत्यर्थः । असमा विषमाः प्रथमतृतीयपञ्चमाः ।

अथ अष्टमं दृश्यम्

(ततो रतूड़ि–विद्याधरौ प्रविशतः)

विद्याधरः—अयि ! रामेश्वररतूड़िन् ! त्वन्तु त्वरितं कण्ठस्थं पद्यं करोषीति प्रसिद्धिरस्ति । तर्हि कथय अच्सन्धि-पद्यम् ।

रामेश्वरः—शृणु सखे ! पञ्चचामरच्छन्दसा निबद्धं सर्वसन्धिपद्य-षट्कम् । तत्राहं पूर्वं पञ्चचामर-लक्षणं वच्मि—

जरौ जरौ जगाविदं वदन्ति पञ्चचामरम् ।

अधुना अच्सन्धि-पद्यं सावधानं शृणु—

(इति नृत्यन् गायति)

अकोऽकि दिर्घ-सन्धिमाहुराद्गुणो भवेदिकि-
त्ववर्ण एचि वृद्धिभृत्त्विको यणच्ययादयः ।
स्युरेच एङ एत्यति अपूर्वता पदान्तगात्
सदा द्वितीयमीत्वमूत्वमेत्वमेति नान्यथा । इति ॥

विद्याधरः—अहो कोकिलोऽपि लोप्यतेऽनेन ते कण्ठ-रागेण, नर्तक्योऽपि निराक्रियन्ते तेऽङ्गहारेण । अस्तु अर्थोऽप्यभिधीयतामस्य ।

रतूड़ी—शृणु सावधानः। अकः अकि परे उभयोर्मेलनेन दीर्घ-सन्धिम् आहुः कथयन्ति (आचार्य्या इति शेषः) आद् अवर्णाद् इकि परे उभयोर्मेलनेन गुणो भवेत्। अवर्णः एचि परे वृद्धिभृत् स्यात् (उभयोर्मेलनेनेति शेषः।) तु किन्तु अचि इकः स्थाने यण्, एचः स्थाने च अयादयः (अय् अव् आय् आव्) स्युः। पदान्तगात् एङः अति परे प्रपूर्वता एति=याति द्वितीयं=द्विवचनम् ईत्वम् ऊत्वम् एत्वं सदा=नित्यं अन्यथा न एति, यथा स्थितमेव तिष्ठति। इति पिण्डितोऽर्थः।

विद्याधरः—श्लोकार्थस्तु त्वया साधु विवृतः। परन्तु श्लोक-मध्ये संगृहीतसूत्राणाम् अर्थ-ज्ञानं कथं स्यात्।

रतूड़ी—सूत्रार्थस्तु त्वयैव कर्तव्यः। श्रुता नहि पाणिनिप्रक्रिया ?

सूत्रवृत्तिं स्वयं कुर्य्युरध्यायिनः।
पाठनस्य प्रकारोऽयमासीन्मुनेः।
तद्विहन्त्री पठत्प्राण-हन्त्री हृदा।
निष्क्रमापाठ-रीतिर्द्रुतं हीयताम्॥

विद्याधरः - अये सखे! अहम् अभ्यस्तवान् अस्मि 'ऋजुपाणिनीयम्' 'सम्प्रघुष्य क्रमात्' इत्यादि वृत्तिनिर्माण-नियममपि जानामि। अतो यत्नं करोमि सूत्रार्थं कर्तुम् त्वं मे शुद्ध्य-शुद्धी निगृहाण।

रतूड़ी—तर्हि त्वं क्रमेण चल। सूत्राणां प्रयोगाणां च क्रमत्यागो न स्यादिति सर्वदैव अवधानीयम् त्वया।

विद्याधरः—शृणु वेद + अध्ययनम् इति स्थितौ अकः सवर्णे दीर्घः ६।१।१०१ अत्र संहितायाम् ६।१।७२ एकः पूर्वपरयोः ६।१।८४ इति द्वे सूत्रे अधिकृते स्तः, इको यणचि ६।१।७७ इत्यतः अचि इत्यनुवर्तते। ततश्च अकः सवर्णे अचि परे संहितायां विषये पूर्वपरयोः स्थाने एको दीर्घः स्याद्। इत्यर्थो भवति।

रामेश्वरः—'स्थाने' कथमत्रायातीति त्वया नोक्तम्।

विद्याधरः—आम् आम् साधु त्वया त्रुटिर्धृता। षष्ठी स्थानेऽयोगा (१।१।५१) अयोगा असम्बन्धा षष्ठी स्थाने ज्ञेया। इत्यर्थकात् परिभाषासूत्रात् 'स्थाने' इति लभ्यते। इत्येवम् उभयोः अकारयोः स्थाने स्थानसाम्याद् दीर्घाकारे वेदाध्ययनम्, एवं स्वराज्य + आन्दोलनम् स्वराज्यान्दोलनम्, विद्या+अध्ययनम् विद्याध्ययनम्, विद्या + आलयः विद्यालयः। इत्थमिकारोकारादिष्वपि ज्ञेयम्।

रा० रतूड़ी—अयि भ्रातः! स्वतन्त्रस्वरेषु समानयोर्योगे सर्वथा दीर्घो भवतीति युक्त्या प्राप्तमेवानुवदति सूत्रमिति पाणिनिमुनेर्विज्ञानमपि विद्धि।

विद्याधरः—आम् साधु, सम्प्रति आद्गुणः ६।१।८७ इत्यस्यावसरः। इति तथैव शृणु, संहितायाम्, एकः पूर्वपरयोः अचि, इति, पूर्ववदेव इहापि अन्वेति। ततः आद् अवर्णाद् अचि परे संहितायां विषये पूर्वपरयोः स्थाने एको गुणः स्याद् इत्यर्थः सम्पद्यते। उदाहरणम्—राम + इच्छा इत्यत्र अकारेकारयोः स्थान-साम्यात् एकारैकादेशे रामेच्छा। एवम् रमा + इच्छा

=रमेच्छा। राम + ईहा=रामेहा। रमा + ईहा=रमेहा। सूर्य + उदयः=सूर्योदयः, तारा + उदयः = तारोदयः, सागर + ऊर्मी = सागरोर्मी, गङ्गा + उर्मी = गङ्गोर्मी, देव + ऋणम् =देवर्णम्, गोपा + ऋणम् = गोपर्णम्। इत्याद्युदाहरणम्। इत्येवमेवास्मिन् संहितैकादेशप्रकरणे सर्वेषां सूत्राणाम् अर्थो ज्ञेयः। इत्येव तु महर्षेः पाणिनेः प्रकरणवैशिष्ट्यमुच्यते। अतश्च त्वं स्थालीपुलाकन्यायेन, इति जानीहि, यदहम् एतत्प्रकरणस्थानां सर्वेषां सूत्राणाम् अर्थं ज्ञातुं तदुदाहरणानि च दातुं क्षमोऽस्मीति। सम्प्रति अपराण्यपि पात्राणि स्व-स्व-भूमिकासु सन्नद्धानीति तेभ्योऽपि समयः समर्पणीयः।

रा० रतूड़ी—साधु सखे! साधु।

"युक्ति-युक्तं वचो ग्राह्यं बालादपि शुकादपि।
युक्तिहीनमनादेयमप्युक्तं पद्मयोनिना" ॥

इति ते वचसा अहमाप्यायितोऽस्मि। इति द्रुतं रङ्गादपसरावः। (इति निर्गताः सर्वे)

इति अष्टमं दृश्यं समाप्तम्।

—०—

अथ नवमं दृश्यम्

(स्थानं स एव विद्यालयच्छात्रावासः। तत्र हरीशशाह-रामचन्द्र-नौटियालौ विवदमानौ प्रविशतः।)

रामचन्द्रः—सखे हरीश ! कथं त्वं एकेनैव पञ्चचामरच्छन्दसा विसर्गसन्धिं समापयसि। तन्मामपि श्रावय।

हरीशः—अहो त्वम् एतावतैव चकितोऽसि, अत्र विद्यालये सर्वेऽपि च्छात्रास्तेनैव पञ्चचामरच्छन्दसा सर्वानेव सन्धीनभ्यस्यन्ति।

रामचन्द्रः—अहो तर्हि त्वं तद्विसर्गसन्धिगं श्रावय पद्यम्।

हरीशः—शृणु समाहितमनाः—(नृत्यन् गायति)

अतोऽति रुत्वमुत्वमेत्यतो हशीदमेव हि।
त्ववर्णतोऽशि रुत्वमेति लोपगां यकारताम्॥
कखोःपफौ विसर्ग एति वाद्धतां स वा शरि-
च्छवि त्रयं शषंसमेति तस्य वर्ण-साम्यतः॥

इसके अपवाद

रामचन्द्रः—अहो विरसायेते मयूरनृत्यपरभृत्स्वरौ ते नृत्यगानाग्रे। विशदयाऽस्यार्थं पुरतो मे।

हरीशः—श्रूयतां मनोयोगाद्, अशुद्धिर्मे सूचनीया। अतः ह्रस्वाकारात् अति ह्रस्वाकारे परे रुत्वम् उत्वम् एति=प्राप्नोति। अतः ह्रस्वाकारात् हशि परेऽपि इदमेव हि अर्थात् रुत्वं उत्वं

एति। अवर्णतः ह्रस्वदीर्घोभयाकारतः अशि परे रुत्वं लोपगां यकारताम् प्राप्नोति। विसर्गः कखोःपफोःपरतः वा विकल्पेन अर्द्धतां अर्द्धविसर्गतां कखोर्जिह्वामूलीयतां पफोः परयोश्च उपध्मानीयताम् एति पक्षे विसर्गतामेव एतीत्यर्थः। स विसर्गः शरि शर्प्रत्याहारे परे विकल्पेन। तथा च्छवि छव् प्रत्याहारे परे नित्यं तस्य छव्-प्रत्याहारस्य वर्ण-साम्यतः वर्णानुसारं त्रयं शषसं तालव्यं मूर्द्धन्यं दन्त्यं च एति निर्गच्छति। इति विशदार्थः।

रामचन्द्रः—अयि सखे हरीश ! त्वन्तु सत्यं विशदतरं पद्यार्थं कृतवान्-सम्प्रति पद्यमध्ये संगृहीत-सूत्राणामपि इत्थमेव विशदमर्थं सोदाहरणं कुरु। तदा जाने ते पाण्डित्यम्।

हरीशः—साधु साधु, अहं करोमि विशदार्थम्, किन्तु त्वयापि मध्ये मध्ये मे साहस-वृद्धिर्विधेलिमा।

रामचन्द्रः—यावच्छक्यं साहाय्यं कर्तास्मि। त्वं चल सार्जवेन पथा।

हरीशः—अतोरोरप्लुतादप्लुते ६।१।११३ इति सूत्रम् अत्र संहितायाम् ६।१।७२ इत्यस्याधिकारः, एङः पदान्तादति ६।१।१०९ इत्यतः अति इत्यनुवर्तते। ऋत उत् ६।१।१११ इत्यतः उदित्यनुवर्तते। ततश्च अप्लुतादतः अप्लुते अति परे संहितायां विषये रोः स्थाने उद्भवति। इत्यर्थे सिद्धे रामः+अत्र इत्यत्र अस्य सूत्रस्य प्रवृत्तौ पूर्वत्रासिद्धम् ८।२।१ इति न्याया धीश-न्यायेन विसर्गासिद्ध्या रेफोपस्थितौ 'एकदेशविकृतमनन्यवत्' इति न्यायेन रुत्वसिद्धौ राम रु अत्र इत्येवं स्थिते रुत्वस्य उत्वे 'आद्गुणः' इति गुणे स्थानसाम्याद् ओकारे

रामो अत्र इति जाते एङः पदान्तादति ६।१।१०९ इति पूर्वरूपे रामोऽत्र, इति प्रयोगसिद्धिः। एवमेवाधिकारानुवृत्तिभ्यां सूत्रार्थं कृत्वा प्रयोगसिद्धिः कार्य्या। विसर्गसन्धौ अश् खर् इति प्रत्याहारद्वयभेदेनैव सन्धिकृत्यं समाप्यते।

रामचन्द्रः—अये मित्र! कथम् उद्विजसे, हशि च ६।१।११४ इत्यस्यापि तु एतादृश एवास्ति सूत्रार्थः। सर्वमपि पूर्वत्रानुवृत्तं केवलं अति अप्लुते इति वर्जयित्वा समेति। ततश्च अप्लुतादतः हशि परे रोः स्थाने उद्भवतीत्यर्थः सिध्यति। रामः+ हसति इत्युदाहरणे पूर्ववदेव सर्वं कृत्यं पूर्वरूपं विहाय भवति। इति कृतं मया ते साहाय्यम्, अग्रे चल सम्प्रति।

हरीशः—रामः+इह इत्यत्र भो भगो अघो अपूर्वस्य योऽशि ८।३।१७ इत्यत्र रोः सुपि ८।३।१६ इत्यतः रोः इत्यनुवर्तते। पदस्य ८।१।१६ इत्यधिकारे तदन्त-विधौ भो भगो अघो अपूर्वस्य पदान्तस्य रोः स्थाने यः स्याद् अशि परे इत्यर्थकेनैतेन सूत्रेण रोः यत्वे कर्तव्ये 'निमित्तापाये नैमित्तकस्याप्यपायः' इति परिभाषया रेफोपस्थितौ एकदेशविकृतमनन्यवद् इति रुत्वसिद्धौ 'राम रु इह' इति स्थित्या रोः यत्वे राम य् इह, इत्यत्र लोपः शाकल्यस्य ८।३।१९ इति यलोपे राम इह। इति सिध्यति?

रामचन्द्रः—किं भो हरीश! अत्र आद्गुणः ६।१।८७ इत्यस्य प्रवृत्ति कथं निषेधसि।

हरीशः—पूर्वत्रासिद्धम् ८।२।१ इति न्यायाधीशाज्ञया यलोपासिद्ध्या

निषेद्धास्मि। इत्येवं ते अश् प्रत्याहार-कृत्यं तु समाप्तम्। खर्प्रत्याहारकृत्यं तु त्वमेव कुरु।

रामचन्द्रः—अस्तु अहन्तु तत्करोमि। किन्तु त्वमपि मनोयोगेन शृणु।

हरीशः—श्रवणे कः प्रयासः, शृणोमि श्रवणाभ्याम्।

रामः—रामः करोति। इत्यत्र कखोः पफोः इत्यल्चतुष्टये खरवसानयोर्विसर्जनीयः ८।३।१५ इत्यनेन पदस्येत्यधिकृतस्य रोरि ८।३।१४ इत्यतोऽनुवृत्तस्य रेफस्य विशेषणतया तदन्तविधिना खरवसानयोः परयोः पदान्तस्य रेफस्य विसर्गः स्यादित्यर्थकेन रेफस्य विसर्गे। ततः कुप्वो≍क≍पौ च ८।३।३७ इति विसर्गस्य≍क≍पादेशे कदाचिद्विसर्गादेशे च कृते राम≍करोति रामः करोति, राम≍खनति रामः खनति, राम≍पचति रामः पचति। राम≍फलति रामः फलति। इत्यादि उदाहरणं ज्ञेयम्।

हरीशः—तिष्ठ त्वम्, वाशरि ८।३।३६ इत्यस्याहम् अर्थं करोमि। अत्र शर्परे विसर्जनीयः ८।३।३५ इत्यतो विसर्जनीय इति प्रथमान्तं विसर्जनीयस्य सः ८।३।३४ इत्यतो विसर्जनीयस्येति षष्ठ्यन्तं च पदद्वयम् अनुवर्त्य शरि वा विसर्जनीयस्य विसर्जनीयः स्याद् इति अर्थं कृत्वा रामः शेते पक्षे रामश्शेते इत्याद्युदाहरणं सम्पाद्यते। अग्रे कुरु त्वं साहाय्यम्।

रामचन्द्रः—गृहाण साहाय्यम्। रामः+तथा। इत्यत्र, विसर्जनीयस्य सः ८।३।३४ (खरि) इत्यर्थकेन विसर्गस्य सत्वे रामस्तथा।

एवमेवावशिष्टे छवि स[illegible]त्यन दन्त्य-तालव्य मूर्द्धन्य-सशषोदाहरणानि ज्ञेयानि इत्यलम् ।

हरीशः—समाप्तमिदं विसर्गसन्धि-पद्यम् । केवलम् अश्-खर्-प्रत्याहार-भेदेनैव सर्वं सम्पद्यते । इति जानीहि ।

रामचन्द्रः—सखे हरीश ! आवाभ्यां भूयान्समयोऽन्येषां गृहीतस्ते सर्वेऽपि भूमिकाभृतः प्रतीक्षन्ते समयम् । अतोऽपसराव आवाम् ।

(इति निष्क्रान्ताः सर्वे)

इति नवमं दृश्यं समाप्तम् ।

—०—

अथ दशमं दृश्यम्

(स्थानं स एव विद्यालयच्छात्रावासस्तत्र दयाधरगौड: अन-, सूयाप्रसादसती च संलपन्तौ प्रविशतः)

अनसूयाप्र०:—अये दयाधरगौड़ ! किं त्वं पञ्चचामरच्छन्दसा हल्सन्धि ज्ञानं कृतवान्न वा ।

दयाधर—किमहं शिथिलश्च्छात्रोऽस्मि यन्नूतनमाविष्कारं नाद्रि यदाहि गुरुपादैः पञ्चचामरच्छन्दसा सन्धिज्ञानं नि तदैवाहं द्रुतमेव सर्वं पद्यजातमभ्यस्तवान् ।

अनसूयाप्र०—तर्हि हल्सन्धि-पद्यानि ब्रूहि ।

दयाधरः—शृणु सावधानमनाः (नृत्यन् गायति)

सतू शचू षटू समेत्य तत्सवर्णतामितः
पदान्तझल्तु जश् सदा स चर् खरि प्रजायते।
स जम् ञमि प्रयाति वा लघोः परोऽचि ङम् सदा
छिरेति वा पदान्तझय्परोऽमि शः छकारताम् ॥

अनसूयाप्र०—अहो जृम्भते रम्भाऽस्य नृत्यस्य पुरतः । क्रियतां क्रियत अर्थोऽपि पद्यस्यास्य यथावत् ।

दयाधरः—बाढं बाढं, करोमि यथावदर्थम् सतू=सकारतवर्गौ कर्ता शचू षटू=शकारचवर्गौ षकारटवर्गौ च कर्मणी समेत्य प्रा

तत्सवर्णतां=तत्समानवर्णताम् इतः प्राप्नुतः। पदान्तझल् सदा जश् वर्णः प्रजायते, स एव झल् खरि=खर्प्रत्याहारे परे चर्=चर्प्रत्याहारवर्णः प्रजायते। स झल् ञमि परे ञम् वर्णो वा विकल्पेन भवति। लघोः=ह्रस्वस्वरात् परः ङम् वर्णः अचि (स्वरे) परे द्विः=द्विधा सदा=नित्यम् एति। पदान्तझयः परः शः=शकारः अमि=अम् वर्णे परे वा विकल्पतः छकारताम् एति प्राप्नोति। इति कृतो मया यथावदर्थः।

अनसूयाप्र०—साधु सखे! साधु, अति विशदयसि अर्थम्। सम्प्रति एकम्पद्यमवशिष्यते। तदपि ईदृशमेव विशदयार्थतः।

दयाधरः—(नृत्यन् पद्य गायति)

पदान्तझय्परो ह एति वा पुरः सवर्णताम्
२१३१६ लघुं तुगेति सन्धिगः छकारवर्णके परे।
तवर्ग एति ले परे लकारतामिति ध्रुवम्
स्वनुस्वरंस्त्रयं समेति नः सवर्णतश्छवि॥

(अर्थं करोति) पदान्तात् झयः परः हः=हकारः वा विकल्पेन पुरः सवर्णताम्=झय्प्रत्याहार-वर्ण-सवर्णताम् एति=गच्छति। छकारवर्णके परे सन्धिगः=भाविसन्धिकार्यमनुभवन् तुक् लघुं स्वरम् एति=याति। तवर्गः ले=लकारे परे ध्रुवं=नित्यं लकारताम् एति=प्राप्नोति। नः=पदान्तनकारः छवि=छव्प्रत्याहारवर्णेषु परेषु षट्सु सवर्णतः छव्प्रत्याहारवर्णसाम्येन साकं सु अनुस्वरन् सम्यक्

अनुस्वार। [illegible] अयं सं (शषसम् इतियावत्) एति प्राप्नोति इति विशदार्थः।

अनसूयाप्र०:—सखे दयाधरगौड ! अर्थस्तु त्वया साधु विशदितः सम्प्रति पद्ययोर्मध्ये समागतानां पाणिनिसूत्राणां विशदमर्थं सोदाहरणं कुरु तदा जाने ते पाण्डित्यम्।

दयाधरः—तत्र कः प्रयासः। प्रथमं प्रथमपद्यगं सूत्रार्थं शृणु। स्तोः श्चुना श्चुः ८।४।४० स् च तुश्च तयोः समाहारः स्तु तस्य स्तोः सकारतवर्गयोः (पुंवद्भावपक्षे रूपम्।) एवमेव श्चुना शकारतवर्गाभ्यां योगे श्चुः शकारचवर्गौ भवतः। (सौ... पुंस्त्वम्) अत्र (स्थान्यादेशयोर्यथासंख्यं निमित्तकार्यिणोस्तु न... उदाहरणम्---रामस् + शेते रामश्शेते। राम स् + चिनोति रामश्चिनोति। सत् + चित् सद् + चित् सज् + चित् सच्चित्। (स्तोः) ष्टुना ष्टुः ८।४।४१ पूर्ववदर्थः कार्यः उदाहरणम—रामस् + षष्ठः रामष्षष्ठः। रामस् + टीकते रामष्टीकते। तत् + टीका तद् + टीका तड् + टीका तट्टीका। झलां जशोऽन्ते ८।२।३६ अत्र पदस्य ८।१।१६ इत्यधिकारस्य इडाया वा ८।३।५४ इति यावत् गन्तु... अन्तशब्देन योगे पदस्यान्ते झलां जशः स्युः। इत्यर्थः। उदाहरणम्—वाक् + ईशः वागीशः। खरि च ८।४।५५ अत्र झलां जश् झशि ८।४।५३ इत्यतः झलाम् इत्यस्य अभ्यासे चर्च्च ८।४।५४ इत्यतः चर् इत्यस्य अनुवृत्तिः खरि झलां चर् भवतीत्यर्थः। अद् + ति अत्तीत्युदाहरणम्। यरोऽनुनासिकेऽनुनासिको वा ८।४।४५

पदान्ताट्टोरनाम् ८।४।४२ ... ३।१।९६ तुदा ... णिच ... तादिति पञ्चम्यन्तस्य षष्ठ्यन्ते विपरिणा... पदा तस्य य... अनुनासिके परे वा अनुनासिको भवतीत्यर्थः। एतद् + मुरारिः एतन्मुरारिः। इत्याद्युदाहरणम्। ङमो ह्रस्वादचि ङमुण्नित्यम् ८।३।३२

'पूर्वत्र पञ्चमी परत्र सप्तमीं षष्ठीं प्रकल्पयति'

इत्यनुशासनात्। 'अचि' इति सप्तम्यन्तस्य षष्ठ्यन्तप्रकल्पनायाम् अच इति जाते ह्रस्वात् परो यो ङम् तदन्तात् परस्य अचः ङमुडागमः स्यात्। इत्यर्थे प्रत्यङ् आत्मा प्रत्यङ्ङात्मा इत्याद्युदाहरणम्। शश्छोऽटि ८।४।६३ झयो होऽन्यतरस्याम्। ८।४।६२ इत्यतो झय इति पञ्चम्यन्तस्य अन्यतरस्याम् इति अव्ययस्य चानुवृत्तौ। वा पदान्तस्य ८।४।५९ इत्यतोऽनुवृत्तस्य च पदान्तस्य पञ्चम्यन्तविपरिणामे पदान्ताज्झयः परस्य शः स्थाने वा छः भवति अटि परे इति सूत्रार्थे "छत्वममीति वाच्यम्" इति वार्तिकबलाद् अम् प्रत्याहारावधौ परे छत्वे पूर्वस्य च चुत्वे तत् + श्मशानम् तच्छ्मशानम्। इत्याद्युदाहरणम्।

अनसूया प्र०:—सखे प्रथमपद्यान्तर्गत-सूत्राणान्तु त्वयार्थः साधुसम्पादितः सम्प्रति द्वितीयपद्यान्तर्गतानामर्थं तथैव सोदाहरणं कुरु।

दयाधरः—अधुनापि नास्ति ते तृप्तिस्तर्हि कर्णशष्कुल्यौ परिवेषय।

अनसूया प्र०:—इयं परिवेषिते मे कर्णशष्कुल्यौ (इति निब-कर्यौ तस्य पुरः स्थापयति:)

दयाधरः- अनुस्वार। [illegible] ः झयो होऽन्यतरस्याम् ८।४।६२ इत्यत्र
इति विशेषार्थः।
[illegible] पदा[illegible] इत्यस्यानुवृत्तस्य पञ्चम्यन्ते विपरिणामे
उदस्थास्तम्भोः पूर्वस्य ८।४।६१ इत्यतः पूर्वस्येत्यनुवृत्तौ
अनुस्वारस्य ययि परसवर्णः ८।४।५८ इति सवर्णोपलब्धौ
पदान्ताज्झयः परस्यः हकारस्य स्थानेऽन्यतरस्यां पूर्वस्य
सवर्णो भवतीत्यर्थो जायते, । वाग् + हरिः वाग्घरि
इत्याद्युदाहरणम्। छे च ६।१।७३ इति सूत्रम्। अत्र
संहितायाम् ६।१।७२ इत्यधिकृतायाम् ह्रस्वस्य पिति
कृति तुक् ६।१।७१ इत्यतः ह्रस्वस्य तुक् इति पदद्वयानुवृत्तौ
छे छकारे परे ह्रस्वस्य तुक् भवतीत्यर्थः प्रजायते
उदाहरणम्—संस्कृत + छात्रः संस्कृत तुक् छात्र
अनुबन्धनिवृत्तौ संस्कृतत् + छात्रः संस्कृतद् + छात्रः संस्कृ
तज् + छात्रः संस्कृतच्छात्रः इति। तोर्लि ८।४।६० अत्र
पदान्तस्येत्यनुवृत्तौ अनुस्वारस्य ययि पर-सवर्णः ८।४।५८
इत्यतः पर-सवर्णानुवृत्तौ पदान्तस्य तोः लि लकारे प
परसवर्णः स्यादित्यर्थे तत् + लुनाति तद् + लुनाति तल्लु
नाति। इत्याद्युदाहरणम्, नश्छव्यप्रशान् ८।३।७ इति
सूत्रम्। अत्र पुमः खय्यम्परे इत्यतः अम्परे इत्यनुवर्तते
मतुवसोरु सम्बुद्धौ ८।३।१ इत्यतो रु इत्यनुवृत्तौ। अम्-परे
छवि परे प्रशान् शब्दं विहाय नान्तस्य पदस्य [illegible]
भवतीत्यर्थे स्वनुस्वरन् + त्रयम्, स्वनुस्वर रु त्रयम्, स्व
स्वरँ रु त्रयम् स्वनुस्वरँ र् त्रयम् स्वनुस्वरँः त्रय
स्वनुस्वरँस्त्रयम्। इति उदाहरणम्। एवमेवान्यत्रापि छ
छव प्रत्याहारान्तर्गते परे राजन् + चित्रम् राजँश्चि

राजन् + टीकसे राजंष्टीक ... ३।१।६६ तुदा/
पद्यान्तर्गतानां सर्वेषामपि ... णिच् ... उदाहरणानि च दत्तानि। वद अ...

अनसूया प्र०ः—सखे दयाधर ! दृष्टं मया ते पाण्डित्यम्; नास्ति मेऽग्रे किञ्चिद्वक्तव्यम्। पश्य देवली-वासुदेवौ सम्प्रति रङ्गे समागच्छतः आवाभ्यां तयोः कृते स्थानदानं कार्य्यम्। इति आवाम् अपसरावः। (इति निष्क्रान्तौ)

इति दशमं दृश्यं समाप्तम्।

—:※:—

अनुस्वार। ... न्
इति विशा...र्थः।

अथ एकादशं दृश्यम्

(ततः प्रविशतो वासुदेव-देवल्यौ संलपन्तौ)

वासुदेवः— अये मित्र देवली: दयाधरानसूयाप्रसादौ यत्कर्तव्यम् आवयो: उपरि त्यक्तवन्तौ तत्तु आवाभ्यां पूरणीयमेव।

देवली:—किं तत् कर्तव्यम् इति सूचय पूर्वम्।

वासुदेवः— अनुस्वारपरसवर्ण-सन्धिपद्यम्, विसर्गस्यापवादसन्धिपद्य आवशिष्येते तयोर्गानम् यथावदर्थकरणम्, तत्पद्यान्तर्ग सूत्राणाञ्च सोदाहरणमर्थकरणमिति कर्तव्यमावयो:।

देवली:—अस्तु तर्हि कर्तव्यपालनन्तु प्रथम कर्तव्म्। अतः पूर्वम् त गानं प्रारभस्व अहं वाद्य-साहाय्यं करोमि। इति उभौ नृत्यन्तौ स्वस्वकर्तव्यम् कुरुतः (वासुदेवो नृत्यन् गायति। देवल नृत्यन् वादयति)

नमौ पदस्य मध्यगावनुस्वरौ परे झलि।
त्वनुस्वरो यथि ध्रुवं सवर्णतां स विन्दते॥
म आशवनुस्वरत्वमेति हल्परः पदान्तगः।
स वैत्यनुस्वरः पदान्तगः सवर्णतां यथि॥
स एष एत आल्परौ विसर्गशून्यतां सदा।
रि रश्च लोपमेति तत्पुरोऽएसमेति दीर्घताम्॥

सुबुद्धिभिः सुपाठकैः स[illegible]

समग्र-सन्धिरुच्यते रसै[illegible]

वासुदेवः—सखे देवलीः ! कीदृशी में गाननृत्यं ।

देवलीः—अहो स्वर्गाप्सरसो मयूराश्चापि ह्रीणीयन्ते तें गाननृत्ये निभाल्य ।

वासुदेवः—अस्तु, अधुना त्वमर्थं कुरु । पद्यार्थेन सह सूत्रार्थोऽपि कार्य्यः उदाहरणानि अपि देयानि !

देवलीः—सर्वं करिष्यामि कथमधीरो भवसि । पदस्य मध्यगौ नमौ अपदान्तौ नकार-मकारौ झलि परे अनुस्वरौ = अनुस्वारौ भवतः । स तु अनुस्वरः अपदान्तः अनुस्वारः ययि = यय प्रत्याहारे परे ध्रुवं नित्यं सवर्णतां बिन्दते प्राप्नोति ।

हल्परः=हल् परः यस्मात् स पदान्तगः मः मकारः आशु=शीघ्रम् अनुस्वरत्वम् अनुस्वारताम् इत्यर्थः । एति याति । स पदान्तगः अनुस्वरः=अनुस्वारः ययि यय्-प्रत्याहारे परे सवर्णतां वा विकल्पेन एति याति । इति पद्यार्थः ।

वासुदेवः—साधु देवलीः साधु पद्यार्थस्तु त्वया साधु सम्पादितः । सम्प्रति सूत्रार्थोदाहरणे अवशिष्येते ।

देवलीः—ते तु त्वयैव कृते शोभेते ।

वासुः—अस्तु, तवानुरोधो मयाङ्गीक्रियते । नश्चापदान्तस्य झलि ८।३।२४ इति सूत्रम् । अत्र मोऽनुस्वारः ८।३।२३ इति

अनुस्वार। [illegible] झलि झल्प्रत्याहारे अपदान्तस्य मः इति विशदार्थः। [illegible]रस्य च अनुस्वारो भवति। उदाहरणं [illegible] [illegible]यते=आक्रंस्यते। पयान् + सि = पयांसि [illegible]

ततः अनुस्वारस्य ययि परसवर्णः ८।४।५८ इति सूत्रम्। अस्यार्थः स्पष्टः। उदाहरणम्—शं + किता = शङ्किता, उं+च्छिता=उञ्छिता, कुं+ठिता = कुण्ठिता, नं+दितः = नन्दितः, कं + पिता = कम्पिता। इत्यादि। मोऽनुस्वारः ८।३।२३ इति सूत्रम्। अत्र हलि सर्वेषाम् ८।३।२२ इत्यतः हलीत्यनुवर्तते। पदस्य ८।१।१६ इत्यधिक्रियते। तच्च मस्य विशेषणं भूत्वा येन विधिस्तदन्तस्य १।१।७२ इति सूत्रबलात् अन्तपदं गृह्णाति। ततश्च हलि परे पदान्तस्य मस्यानुस्वारो भवतीत्यर्थः। उदाहरणम्—कुण्डम् + हसति = कुण्डं हसति। वा पदान्तस्य ८।४।५९ इति सूत्रस्यार्थस्तु अनुस्वारस्य ययि पर-सवर्णः ८।४।५८ इत्यनेनानुवृत्तेन पूर्वसूत्रेण सह कार्य्यः। तथाहि—पदान्तस्य अनुस्वारस्य ययि यय् प्रत्याहारे परे वा विकल्पेन परसवर्णो भवति। उदाहरणम्—तंकथंचित्रपक्षंडयमानंनभःस्थं पुरुषोऽवधीत् = तङ्कथञ्चित्रपक्षण्डयमानन्नभःस्थम्पुरुषोऽवधीत्। इति उदाहरणम्। कथय देवली! सिद्धस्ते मनोरथः।

देवली:—आम् प्रथमपद्यस्य तदन्तर्गत-सूत्राणां च अर्थोदाहरणे तु जाते परन्तु विसर्गापवाद-सन्धिपद्यार्थेन सह सूत्रार्थोदाहरणे अवशिष्येते।

वासु०—स्फुटं वद नावगम्यते ते भूतार्थम्।

देवली:—विसर्गस्य विसर्गसन्धेः अपवा[illegible] ३।१।६६ तुदा[illegible] लोपः पद्यम् तस्य अर्थेन सह त[illegible] णिच् [illegible] परि-अवशिष्येते इत्यर्थः ।

वासुदेवः—तर्हि मित्र ! शृणु त्वं मां, सर्वभेदविश्व [illegible] सं इति इमौ पदत्वं प्राप्तौ शब्दौ आल् आल्[illegible] विहाय आकारात् 'हल् सूत्रस्य' लकारावधि आल्प्रत्याहारः परो ययोः तौ सदा नित्यं विसर्गशून्यताम् एतः गच्छतः । रि रेफे परे रः रेफः लोपम् अदर्शनम् एति गच्छति । तस्य पुरः पूर्वे वामे भागे विद्यमानः अण् अण्प्रत्याहारवर्णः दीर्घतां समेति प्राप्नोति । इत्थं सन्धिः एव रोगः काठिन्यात् सन्धिरोगः स्वसन्धिरोगः स्वस्य आत्मनः सन्धिरोगः तस्य नाशकैः विघातकैः सुबुद्धिभिः सुधीभिः सुपाठकैः विद्यार्थिभिः रसैः षड्भिः पञ्चचामरैः पञ्चचामरच्छन्दोभिस्समग्रसन्धिः अच्झल्-विसर्गापवाद-सन्धिः उच्यते कथ्यते । इति विवृतोऽर्थो मया ।

देवली:—सम्प्रति सूत्रार्थोऽवशिष्यते उदाहरणानि च ।

वासु०—सखे देवलीः ?

"विक्रीते करिणि किमङ्कुशे विवादः"

यदा मया पद्यार्थः कृतः तर्हि सूत्रार्थोदाहरणयोः कियान् विलम्बः । एतत्तदोः सुलोपोऽकोरनञ्समासे हलि ६।१।१३२ अकोः ककाररहितयोः एतत्तदोः एतद् तद् इति द्वयोः शब्दयोः हलि परे अनञ्समासे नञ्समासं विहाय

अनुस्वार। [illegible] यर्थः । उदाहरणम् – सः + हसति= इति विश[illegible]र्थः । [illegible]ति=एष याति इत्यादि । ततः ढो [illegible] [illegible] इति सूत्रात् लोपपदमनुवर्त्य रो रि [illegible]

ततः [illegible] पदान्तस्य रेफस्य रफे परे लोपो भवति [illegible] सूत्रं: ढ्रलोपे पूर्वस्य दीर्घोऽणः ६।३।१११ ढकाररेफलोपे सति पूर्वस्य अणः दीर्घः स्यात् इत्यर्थः । उदाहरणम् यथा हरिर् + राजते = हरी राजते । पुनर् + रमणम् = पुनारमणम् । इति समाप्तम् अस्माकं कर्तव्यम् सखे ? सम्प्रति अपसरामः (इतिनिष्क्रान्ताः सर्वे जवनिकापातः) इति एकादश-दृश्यं समाप्तम् ।

—०—

अथ द्वादशं [illegible]

(स्थानं स एव छात्रावासः । घनो[illegible] उपस्थि[illegible] मणी छात्रौ संलपन्तौ प्रविशतः)

घनानन्दः—अयि सूर्य्य ? किं श्रूयते ? छात्रावासे पाणिनीय-प्रबोध-नाटके सर्वेऽपि छात्राः पात्रभूमिकां गृह्णन्ति । त्वं कथमुन्मनायसे ?

सूर्य्यः—किं कथयसि ? "त्वं कथमुन्मनायसे" इति । अयि सखे ? नाहमुन्मनाये । अहमेव तु तत्र प्रधानपात्रमस्मि ।

घनानन्दः—कथं भोः कथम् नाहं ते भावमवगच्छामि । त्वं तु तत्र दृष्टिपथमपि नायासि । अत्र दत्ततालं गर्जसि अहमेव प्रधानप्रात्रमस्मीति । कथमेतज्जाघटीति ।

सूर्य्यः—कथमेवतज्जाघटीति ? इति पृच्छसि । शृणु यथा जाघटीति तथाहं संघटयामि ।

घनानन्दः—बोधय मां तदाहं जाने ते पाण्डित्यम् ।

सूर्यः—अये मित्र ? इमे दिन-त्रयेण रसैः पञ्चचामरच्छन्दोभिः सर्वान् सन्धीन् गायन्तो नृत्यन्ति । अहन्तु द्वाभ्यामेव स्रग्विणीच्छन्दोभ्यां विनैव सूत्रम् स्थानयत्नाभ्यामेव सर्वान् सन्धीन् सम्पादयामि । शृणु ।

विनैव लवण-चोदौ रागः साधु प्रजायते ।
शाब्दिकाः साधुवादैर्मामभिनन्दन्ति विस्मिताः ॥

अनुस्वार। त्वन् ... चमत्कारः। एकस्मिन्नेव रूप्यके त्वम्
इति विसर्गार्थः। ... रयसि। (इत्युभौ हसतः)

... ? किं नास्ति चमत्कारोऽयम् शृणु—
ततः ... गायन्नृत्यति घनानन्दोऽपि तस्य साहाय्यं
... वाद्येन)।

स्थानयत्नैर्हलां सन्धिराधीयताम् ।
स्थान-मात्रप्रभावादचां सन्धयः ॥
अश्खरोर्भेदतः स्यात् स वैसर्गिको ।
रुर्भवेल्लोपभृद् योऽप्यवर्णादशि ॥१॥
हश्यति स्यादतो रुः स उः सन्धिगः।
स्थान-साम्येन खषु व्यवस्था मता ॥
आलि चैषोऽपि सोऽयं विशर्गप्रहृद् ।
रो रि लोपे पुरोऽण् दीर्घतां विन्दते ॥२॥

घनानन्दः— अहो नृत्यं गानं च ते विदुषोऽपि विमोहयतः। अस्तु, क्रियताम् वैशद्यमस्यार्थस्य उदाहरणमपि प्रदीयताम्। कथं स्थान-यत्नाभ्यां हल्सन्धिः केवलं स्थानमात्रादचाम् सन्धिश्चेति।

सूर्यः—किं त्वमद्यापि संशेषेऽस्मिन् विषये? पश्य मे हस्त-लाघवं वैलक्षण्यं च सन्धि-सिद्धौ। हलां सान्धिः, स्थानयत्नैः स्थानानि तात्वादीनि। यत्नाः घोषादयः। प्राणाश्च यत्न-भेदाः। तैः आधीयताम् क्रियताम्। यथा – रामस् + शेते इत्यत्र दन्त्य-

सकारस्य तालव्येन शकारेण ... ३।१।६६ तुदा लोप: ...
तालव्यः शकारो जायते ... णिच ... परि-
ऽघोषोऽल्पप्राणो हि तका... प्रविश्य ... सं
ऽल्पप्राणः एव तालव्यः चव... उपस्थिता-
त्यादौ मूर्द्धन्येन टकारेण युक्त... घोषो
मूर्द्धन्यो हि टकारो जायते । अत्र स्थान्यादेशयोरेव विवेको नतु निमित्तकार्यिणोः । तत्र मुखे तु ऊर्ध्वाधर-भावेन स्थितानां दन्त्य-तालव्य-मूर्द्धन्य-स्थानानामेव ग्रहणविवेकोऽयम सम्पृक्तत्वात् न तु कण्ठस्थोष्ठस्थयोरतिपार्थक्यात् । किं मित्र घनानन्द ! दृष्टं त्वया मे हस्त-लाघवम् ।

घनानन्दः—आम् हल्सन्धौ तु दृष्टं ते बुद्धिवैभवम् । अच्सन्धौ अपि दर्शय कथं स्थानमात्रप्रभावात्तां करोषि ?

सूर्य॰—अरे अद्यापि ते मोहो न व्यपगतः । अहं सर्वमपि अच्सन्धि स्थानज्ञानात् करोमि । पश्य, वेद + अध्ययनम् इत्यत्र पूर्वपरयोः संहितयोः अकारयोः कण्ठ्ययोर्मेले द्विमात्रिको दीर्घः कण्ठ्यः आकारो जायते । एवमेव दधि + इह दधीह, दधि + ईहसे = दधीहसे । इत्यादिषु स्थानसाम्येन दीर्घकारादयो ज्ञेयाः, तालव्येन इकारेण ईकारेण वा मिलितः तालव्येकारो द्विमात्रिक ईकारो भवति, दधीह, दधीहसे इत्यादि । अत्र ते चतुर्मुखो ब्रह्मापि नान्यथा कर्तुं समर्थः स्यात् । एवं हि सर्वत्रैवो कारादिष्वपि सवर्णेषु स्वतन्त्रस्वरेषु ज्ञेयम् । दृष्टं मे करकौतुकम् ?

घनानन्दः—अहो सत्यं ते चमत्कारो मां भृशं चमत्करोति । सम्प्रति

अनुस्वार। [illegible] [illegible]मात्रेणैव सर्वोऽपि सन्धिः साध्यते इति विश[illegible]र्थः । [illegible]प्रत्र इत्यत्र तालव्य इकारः तालव्य [illegible] [illegible]यतो हि इकारः स्वतन्त्रः अकारोऽपि [illegible] ततः [illegible] एव अकारेण सम्पर्कमिच्छति । सहि स[illegible]ः [illegible] यकारमर्द्धमात्रिकं कृत्वा तेन सह सम्पृङ्क्ते। इति हि विज्ञानम् । इत्थं राम + इच्छेत्यत्र कण्ठ्यतालव्ययोः अकारेकारयोः सम्पर्के कण्ठ्यतालव्य एव एकारो गुणो भवति । जन + एकता=जनैकता, जनता + एकता=जनतैकता, देव + ऐन्द्रियम् = देवैन्द्रियम् , देवता + ऐश्वर्य्यम्=देवतैश्वर्यम् इत्यत्र कण्ठ्येन अकारेण आकारेण च सह कण्ठ्यतालव्य-स्थानीयः एकारः ऐकारश्च सम्पृक्तौ येन स्थान वृद्धया वृद्धि-रूपम् ऐकारमात्मरूपं कण्ठ्यतालव्यं कुरुतः । एवं हि जन+ ओघः = जनौघः जनता+ओघः = जनतौघः, एवं मम + औत्क-ण्ठ्यम् = ममौत्कण्ठ्यम् , गङ्गा+औद्धत्यम् = गङ्गौद्धत्यम् । इत्यत्र कण्ठ्येन अकारेण आकारेण च सह यदा कण्ठ्योष्ठ्यौ ओकार औकारश्च मिलतः चेत् स्थानवृद्धया वृद्धिरूपम् औकारमेव मिलित्वा आत्मरूपं सम्पादयतः । इति विज्ञानमत्र विद्धि इत्यहो सूर्य्य ? सत्यं ते स्थानमाहात्म्यं विलक्षणम् विद्यते । विश्वाश्चर्य्य-मध्ये अस्यापि स्थानं देयमेव भाति ।

सूर्य्य—अहो इयतैव त्वं ।

"गण्डूषजलमात्रेण शफरी फर्फरायते"

इतिवत् कथं फर्फरायसे । अग्रे तु पश्य में कौतुकम् ।

घनानन्दः—दर्शय दर्शय, ते कौतुकं ... ३।१।६६ तुदा. लोपः

सूर्य्यः—पश्य पश्य, (पद्यं गायन् अर्थयन् ... णिच् ... ना पार-

अश्वरोर्भेदतः स्या...

प्रविश्य ... सं

इत्यादि विसर्गे भवः वैसर्गिकः स ... उपस्थितादि स्यात् भवेत् । तथाहि अवर्णात् परः सः ... परे लोप-भृत् यः यकारो भवेत् । यथा राम रु + इह इत्यत्र रु इत्यस्य लोप-भृत् यकारो जायते । ततश्च यस्य लोपे राम इह। इति सिद्धः प्रयोगो भवति। अग्रे हशि अति च अतः ह्रस्वाकारात् परः रुः सन्धिगः उः भवति । यथा राम रु+हसति । इत्यत्र रुः उकारो भवति । ततश्च गुणसन्धौ रामो हसति । इति प्रयोग-सिद्धिः । राम रु+अत्र, इत्यत्र रोः उकारे ततो गुणे पूर्वरूपे रामोऽत्र इति प्रयोग-सिद्धिः ।

घनानन्दः—अये सूर्य्य ! कथं त्वं गुणे कृते गुणे कृते एतावन्मात्रं वदसि गुणस्य नाम-निर्देशं न करोषि ।

सूर्य्यः—अहो वालिश्यं वालच्छात्राणां पूर्वं त्वमेव स्थानमाहात्म्यं वर्णयन्न तृप्तोऽभवः । अत्रोद्गिरसि गुणस्य नामनिर्देशं न करोषीति । अहो विचित्रम् ते बालिशत्वम् । अहो महापण्डित राम+उ इत्यत्र कण्ठ्योष्ठ्ययोः अकारोकारयोः कण्ठ्योष्ठ्य एव तु ओकारो भविष्यति स्थान-साम्यात् । तर्हि कथमहं गुणनाम्-निर्देशं करोमि । नाहं त्वद्वद्बालिशः । लघुकौमुदी-घोषका अपि तु "ओदौतोः कण्ठतालु" इति जानन्ति । पश्य पश्य,

"स्थानसाम्येन खलु व्यवस्था मता०"

अनुस्वार। ... अर्थं करोति) खर्षु खर् प्रत्याहाराऽ इति विशदार्थः । ...नैव व्यवस्था सन्धौ इति शेषः ... राम: करोति इत्यत्र कण्ठ्यो विसर्गः ततः ... विसर्ग एव तिष्ठति, विकल्पेन जिह्वामूलीयो ... भवति। स्थानमर्यादा तु तत्राप्यस्ति एव। एवमेव सर्वत्रैव दन्त्य-तालव्य-मूर्द्धन्येषु त-थ-च-छ-ट-ठेषु खर्षु ते एव स-श-षा भवन्तीति किं पिष्टपेषणेन । अरे घनानन्द ? अपवादसन्धिमपि कियन्तं शृणु "आलि चैषोऽपि० (इति नृत्यन् गीत्वा अर्थं करोति !) आलि = अकारव्यतिरिक्तेषु सर्वेष्वपि अक्षरेषु अयं सः एषः अपि । सः एषः इति रूपद्वयमित्यर्थः । विसर्गप्रहृत् विसर्गविनाशकं स्यात् । अस्य रूपद्वयस्य विसर्गो विलुप्तो भवतीति सारांशः । यथा सः + आयाति = स आयाति । सः + हसति = स हसति । एषः + आयाति = एष आयाति । एषः + हसति = एष हसति इत्यादि । (पुनर्नृत्यन् गायति ततोऽर्थं करोति)

रो रि लोपे पुरोऽणु० इत्यादि !

रः रेफस्य रि रेफे परे लोपे जाते पुरः अग्रे पूर्वं रेफस्येति यावत् स्थितः अण्=अण्प्रत्याहारः दीर्घतां विन्दते—प्राप्नोति। यथा—विर् + रौति = वीरौति । पुनर् + रमते = पुनारमते इत्यादि । इति स्थानयत्नाभ्यां सन्धिसम्पादनप्रतिज्ञा पूरिता मया । साम्प्रतं यत्ते वक्तव्यम् तद्यथेच्छं वद ।

घनानन्दः—अहो सूर्य्य ? सत्यं त्वं सन्धिसंसारे सूर्य्य एवासि ।

सर्वोऽपि सन्धिस्त्वया ३।१।६६ तुदा[illegible] लोपः इत्यभिनन्दनीयोऽसि सर्वै[illegible] णिच [illegible] परि- पसरामः । बह्वधिकं समय[illegible]

प्रविश्य [illegible] सं[illegible] [illegible]यासादे उपस्थितानि [illegible]

चलामो वयं भो इतो रङ्गतोऽ[illegible]
परेषां कृते भूमिकां सम्प्रदातुम् ।
शशी पूर्णमेति प्रहृष्टोऽथ कृष्ण-
स्तदीयानुगः पृष्ठतः पश्य पश्य ।

(इति निर्गतौ)

इति द्वादशं दृश्यम् ।

[इति तृतीयोऽङ्कः]

---:*:---

चतुर्थोऽङ्कः

त्रयोदशं दृश्यम्

(स्थानं स एव छात्रावासः । शशि-कृष्णानन्दौ प्रविशतः संलपन्तौ)

शशी—अयि सखे कृष्णानन्द ! कथं त्वं शिथिलो दृश्यसे । इह विद्यालये सर्वेऽपि च्छात्रा अहमहमिकया नाटके भूमिकां गृह्णन्ति । त्वां न क्वापि कस्यामपि भूमिकायां पश्यामि ?

कृष्णानन्दः—सखे शशिन् ! नाहं शिथिलोऽस्मि । अहन्तु अहर्निशं चिन्तयामि यत्कथं रङ्गस्थान् विदुषो विनोदयामीति एकेन शरेण लक्षत्रयं विभित्सामि ।

शशी—तत्कथम् ?

कृष्णा०—रङ्गस्थानां विदुषां मनोविनोदः स्यात् इति प्रथमम् । पाणिनिमहर्षेर्माहात्म्यमुद्दीपितं स्यात् इति द्वितीयम् । अस्माकं च्छात्राणाञ्च ज्ञानलाभः स्यादिति तृतीयम् ।

शशी—र्तहि किमपि समुपलब्धम् उताहो एवमेवाकाशकुसुम-कल्पनया मनोमोदकमेव केवलमस्ति ।

कृष्णा०—नहि मित्र ! बहूपलब्धम् मया । न जानासि पूर्वैः सूरिभिस्समुदीरितमस्ति—

नामन्त्रमक्षरं किञ्चिन्नहि द्रव्यमनौषधम्
नायोग्यः पुरुषः कश्चिद् योक्ता तत्र सुदुर्लभः ।

शशी—जानामि तु, किं तेन ? [illegible] ३।१।६६ तुदा[illegible] लोपः [illegible]

कृष्णा०—तदनुसारं पाणिनिनापि [illegible] णिच [illegible] पार-
रचना एवं विहिताऽस्ति, य[illegible]
चमत्कृतोऽस्मि। तदेव श्रावयि[illegible] प्रविश्य [illegible] सं[illegible] [illegible]यास्मा[illegible] उपस्थिता[illegible]
इहोपस्थितः। [illegible]

शशी—तर्हि श्रावय सखे कर्णौ कण्डूतिं कुरुत आकर्णयितुम् (इति तस्य पुरः कर्णौ कण्डूयति)

कृष्णा०—शृणु अवधेहि च पञ्चचामरपूर्वकं प्रारभे।

समास-शब्दतस्तदीय-विग्रहोऽपि बुध्यताम्।
भवत्यनव्ययोऽव्ययोऽव्ययीभवे समासके ॥
विभक्तिकार्थकेऽधिहर्युपेति विग्रहस्तथा।
प्रधानता बुधैलिमा सदात्र पूर्वगे पदे ॥
तथैव तस्य पूरुषः स पूरुषोऽत्र विग्रहः।
स एव कर्म-धारयः समानमाश्रयं श्रितः ॥
नञास्ति यस्य विग्रहः स नञ्-पुरोऽस्ति पुरुषः।
प्रधानतोत्तरे पदेऽत्र बुध्यते सदा बुधैः ॥
तदीय-पूर्वके पदे विभक्तिरस्ति सर्विका।
अयं समास एति सूत्र-योग-भेदतः सदा ॥
विभक्ति-पूर्वयोगतस्तदीय-नाम सूच्यताम्।
प्रदर्शितानि तानि पाठकैर्गृहेलिमानि वै ॥३॥

प्रिय-सखे शशिन्! छन्दोभेदं चिकीर्षामि।

[illegible] ऽङ्कः

[illegible] ब्रीः

[illegible] नराधः ।

अनुस्वार। [illegible] वन् [illegible]

इति विशा[illegible]र्थः । [illegible] च्चिम—

[illegible]

[illegible] स्यास्ते वहुब्रीहिः स उच्यते ।

ततः [illegible] नतंत्रास्ति बहुब्रीहाविति स्थितिः ॥

सत्र[illegible]:

द्वन्द्वोऽपि स्वपदादेव विग्रहं स्वं वदत्यसौ ।

समाहारस्तथा द्वन्द्व इतरेतर इत्यपि ॥

भेदौ द्वौ चुश्चटुश्चेति विग्रहेण चुटू इति ।

इतरेतर आख्येयो लशकिति समाहृतिः ॥

इत्थं त्वं स्वयमेवाग्रे गद्ये विग्रहमाचर ।

एषां सर्व-समासानामतिवैशद्यवाञ्छया ॥

शशी—सुहृत्कृष्णानन्द ! त्वं तु पद्यैरेव सर्वं समास-रहस्यं वक्षीति महान् प्रतिभाप्रकर्षस्ते । अस्तु, अहमपि त्वत्सम्पर्कात् सर्वेषामेव समासानां यथा त्वं कथयसि, गद्यविग्रहं विदधामि । त्वं सावधानः शृणु ।

कृष्णा॰—सखे शशिन् ! अवहितोऽहं श्रोतुम् त्वं विमृशन् । ब्रूहि ।

शशी॰—न अव्ययः अनव्ययः अनव्ययः अव्ययः सम्पद्यते इति अव्ययीभावः । यस्मिन् समासे अनव्यय-शब्दा अपि समासे जातेऽव्ययतां यान्ति सहि अव्ययीभावः समासः। अव्ययीभावश्च १।१।४१ इति हि सूत्रम् समासमिमम् अव्ययं करोति । हरौ इति अधि-हरि इत्येवम् अस्य-पद विग्रहो ज्ञेयः । पूर्वपदप्रधानो हि अव्ययीभावः समासः

इति तल्लक्षणम्। अव्ययं ... ३।१।६६ तुदा ... लोपः ... णिच ... परि-
वसमास-सूत्रम्।

कृष्णा०—साधु सखे साधु त्वया तु अव्यय... प्रविश्य ... यासा... उपस्थिता...
संम्प्रति तत्पुरुषं विवृणु—

शशी—आम् आम् तमपि विवृणोमि शृणु सावधानम्। स चासौ पुरुषः तत्पुरुषः। प्रथमातत्पुरुषोऽयम्। अयमेव कर्मधारयः समासः कथ्यते। तत्पुरुषः समानाधिकरणः कर्मधारयः १।२।४२ इति हि सूत्रम्। विशेषणं विशेष्येण बहुलम् २।१।५७ इत्यादि-समास-सूत्राणि। तम् पुरुषः तत्पुरुषः। तेन पुरुषः तत्पुरुषः। तस्मै पुरुषः तत्पुरुषः। तस्मात् पुरुषः तत्पुरुषः। तस्य पुरुषः तत्पुरुषः। तस्मिन् पुरुषः तत्पुरुषः। इत्येवं विग्रहप्रतीकमस्मिन् समासे। द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः २।१।२४ इत्यादिसूत्रैः समासोऽयं सम्पाद्यते। तत्र सर्वत्र द्वितीयादियोगविभाग-सूत्राणि पृथगेव ज्ञेयानि। न पुरुषः अपुरुषः। इति नञ्तत्पुरुषोऽपि भेद एकः, अस्यैव ज्ञेयः। उत्तरपदप्रधानः तत्पुरुषः। इति तल्लक्षणम्।

कृष्णा०—अहो शशिन् प्रशंसार्हस्त्वं तत्पुरुष-विवरणे। अस्तु, बहुव्रीहिं विवृणु साम्प्रतम्।

शशी—इदन्तु मे वामहस्तक्रीडनकम्। शृणु समवहितः। बहुःब्रीहिर्यस्य स हि बहुब्रीहिः कृषकः। इति विग्रहप्रतीकम्। अनेकमन्य-पदार्थे २।२।२४ इत्यादि-समाससूत्राणि। अन्यपदार्थप्रधानो

अनुस्वार। ... तल्लक्षणम् । एवं हि, बहुः व्रीहिः ययो
इति विशदार्थः । ... ययोः, यासाम्, एवं सर्ववचनलिङ्गा
... ज्यं बहुव्रीहिसमासविग्रहे ।
ततः ...रणं स्वर्णे सुगन्धं समवैति—

शशि— ... सर्वे: परगुणज्ञा एव गोयन्ते । अग्रे श्रूयताम् ! चुश्च टुश्च चुटू १।३।७ इति इतरेतरयोगः । लश्च शश्च कुश्च तेषां समाहारः लशकु इति समाहारद्वन्द्वः । एवं द्विधा द्वन्द्व-शब्देऽपि विग्रहप्रतीकं दृश्यते । द्वे च द्वे च द्वन्द्वः इति द्वन्द्वं रहस्य० ८।१।१५ इति सूत्रे 'द्वन्द्वम्' इति योगविभागात् पुंलिङ्गोऽपि द्वन्द्वशब्द इतरेतरयोग-समास-सूचको निपात्यते । द्वे च द्वे च तयोः समाहारोऽपि द्वन्द्व-शब्द समाहारद्वन्द्व-सूचको निपात्यते । इतरेतरयोगे तु शब्दानुरूपं द्विवचनं बहुवचनञ्चे-त्युभयमपि भवति । समाहारद्वन्द्वे तु एकत्वं नपुंसकत्वञ्चेत्युभयं नियतमेव । चार्थे द्वन्द्वः २।२।२६ इति समाससूत्रम् । उभयपदप्रधानो द्वन्द्वः । इति हि तल्लक्षणम् । पश्य सखे कृष्ण ! सर्वं ते पद्यं गद्येऽनूदितम्मया ।

कृष्णा०— अयि सखे अनूदितमेव नहि त्वया लवणं मरीचकं च मेल-यित्वा मधुरं सुस्वादुगुणदं च समेधितम् । शृणु अग्रेऽपि— यदि शुश्रूषास्ति ते ।

शशी— त्वं शुश्रूषां पृच्छसि ? अहन्तु शोश्रूये (१) सखे शोश्रूये ।

कृष्णानन्द— तर्हि कर्णगह्वरं मत्पुरतः कुरु (शशी तथा करोति कृष्णो ब्रूते पद्यैः)

टि०—(१) अतिशयेन पुनः पुनः शृणोमीति शोश्रूये । श्रुधातोर्यङन्तरूपम् ।

अन्वर्थसंज्ञा विहिता [illegible] ३।१।६६ तुदा [illegible] लोप: [illegible]
पुरात [illegible] णिच [illegible] ना परि-
कालप्रभावेण विलोपम। प्रविश्य [illegible] सं [illegible]
[illegible] यामादे [illegible] उपस्थितानि
तदर्थसंज्ञानमिह [illegible]

तथाहि इत्संज्ञार्थो यथा एति यातीति इत् याता गन्तेत्यर्थः। प्रत्याहारार्थो यथा—प्रत्याह्रियन्ते वर्णा अनेनेति प्रत्याहारः। समासार्थो यथा समस्यन्ते संक्षिप्यन्ते पदानि यत्र स समासः। समसनम् संक्षेपकरणं वा समासः। एवं षट् इति षट्संख्यकाः शब्दा यस्यां संज्ञायां साहि षट् संज्ञा। यथा–पञ्चन् षष् सप्तन् अष्टन् नवन् दशन् इति षडेव शब्दाः तत्र संज्ञायां सन्तीति अन्वर्था सा। इत्येवमेव सर्वापि महती सज्ञा अन्वर्था ज्ञया। दिङ्मात्रमिह-दर्शितम्। अस्तु साम्प्रतम् अन्येऽपि ललितादयो गृहीतभूमिका आयान्तीति तेभ्योऽप्यवसरो देय इति वयमपसरामः।

(सर्वे निगताः। जवनिकापातः)

इति त्रयोदशं दृश्यम्।

—:*:—

अनुस्वार। [illegible]

इति विश[illegible]र्थः। [illegible]

[illegible]दशं दृश्यम्

[illegible]

ततः [illegible] ललिताप्रसादभोलादत्तौ स्वभूमिकायाम्)

ललि[illegible] — [illegible]लादत्त ! किमेवं दराडायसे ? स्त्रीणां सम्बन्धे पाणिनिमुनेः अभिप्रायं ब्रूहि—

भोलादत्तः—शृणु पद्यं पुरातनं वच्मि यन्मया वृद्धमुखादाकर्णितमस्ति।

अहो ! स्त्रीणां प्रभावोऽयम् यत्पाणिनिमुनिर्हृदा
तासां समादरं कुर्वन् पुरः स्त्रीप्रत्ययानधात्।

तृतीयाध्याये प्रथमे पादे धातोः ३।१।९१ इत्यधिकारे कृत्प्रत्यययोगेन शब्दान् निर्माय चतुर्थाध्याये प्रातिपदिकतोऽपि स्वादियोगेन सुबन्तपदसिद्धिं निर्दिश्य पुनः शब्दतः प्रत्यययोगेन शब्दसर्जनारम्भे सर्वतोऽग्रे स्त्रियाम् ४।१।३ इति सूत्रस्याधिकार आयाति। ततः सर्वे प्रत्ययाः पूर्वम् स्त्रिया अधिकारे भूत्वा पश्चात् तद्धिताः ४।१।७६ इत्यतः प्रारभन्ते। इति मुनिना स्त्रीसमादरः सूचितः। अन्यच्च, स्त्रियाम् ४।१।३ इति सूत्रस्य अधिकारावधि समर्थानाम् प्रथमाद्वा ४।१।८२ इति सूत्रं निर्दिशता समर्थानामिति यावदिति प्रतीकनिर्देशेन श्लेषमहिम्ना समर्थानामेव स्त्रियामधिकारो न असमर्थानाम् इति—

योऽधार्यो दुर्बलेन्द्रियैः'

इति मनुस्मृतिपद्यमपि स्मारयता स्त्रीसमादरातिशयः सूचितः।

ललिता--साधु सखे साधु तर्कितं [illegible] ३।१।९६ तुदा[illegible] लोपः [illegible]
४।१।१ इत्यधिकारसूत्रे [illegible] णिच [illegible] परि-
पृथक् करणम् तयोश्च प्र[illegible]
सर्वमपीदं स्त्रीसमादरातिशय [illegible] उपस्थितानि

भोलादत्तः—इदं सर्वं प्रत्यक्षं पश्य पुंल्लिङ्गश[illegible]तोऽपि स्त्रियां गत्वा आदन्ता जायन्ते। क्वापि दीर्घकारोकारान्ता गौरवशालिनो भवन्ति। यथा अजः (ब्रह्मा) अजा (महामाया) सांख्यानां प्रकृतिर्वा। शिवः शम्भुदेवः, शिवा पार्वती भवानी। इन्द्रः इन्द्राणी। पङ्गुः पुमान् पङ्गूः स्त्री इत्यादयो गौरवगिरः स्त्रीलिङ्गाः शब्दाः पाणिनिकृतं स्त्रीसमादरं सूचयन्ति।

ललिता प्र०—सत्यं सखे सत्यं मन्ये मनुरपि पाणिनीप्रकर्षं द्योतयितुमेव स्वग्रन्थे पूर्वत एव स्त्रीणामभ्यर्हितत्वमुपन्यस्तवान्। तथाहि—

उपाध्यायान् दशाचार्य्य आचार्य्याणां शतं पिता।
सहस्रं तु पितॄन् माता गौरवेणातिरिच्यते। इति

भोलादत्तः—अथ किम्। पश्य कात्यायनोऽपि 'अभ्यर्हितं च २।२।३४' इति वार्तिकम् विधाय माता च पिता च मातापितरौ सीता च रामश्च सीतारामौ इत्यादिषु स्त्रीवर्गस्य अभ्यर्हितत्वात् पूर्वनिपातं वक्ति।

ललिता प्र०—व्याकरणप्रवर्तकः शिवः अर्द्धनारीश्वरो गीयते। तदनुगोऽयं पाणिनिरपि स्वग्रन्थस्य अष्टाध्यायीति स्त्रीलिङ्ग-

अनुस्वार। [illegible] अन्यच्च त्रिषु न्यायाधीशेषु सत्सु अपि इति विशद[illegible]र्थः। [illegible] पैव सर्वाभ्यर्हिता चतुर्थी न्यायाधीशा [illegible]

ततः [illegible] भूतार्थविगतिर्जायते अतोऽतिविशदयेदम्।

ललि० सत्यम्ः [illegible] गूढार्थत्वम् ? विप्रतिषेधे परं कार्य्यम् १।४।२ पूर्वत्रासिद्धम् ८।२।१ असिद्धवदत्राभात् ६।४।२२ इति त्रिषु न्यायाधीश-सूत्रेषु विद्यमानेष्वपि 'परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः' इति परिभाषा हि चतुर्थी न्यायाधीशा कथ्यते। या हि एतेषां कृतमपि निर्णयं प्रच्याव्य स्वीयं निर्णयम् अभ्यर्हितं करोति।

भोलादत्तः—उदाहरणतो दर्शय तदा तु जानेऽस्या अभ्यर्हितताम।

ललिता—उदाहरणन्तु पूर्वदृश्ये भवन्तीति प्रयोगे दर्शितम्। तत्रैव द्रष्टव्यमिमम् त्वयापीत्यलम् प्रसक्तानुप्रसक्त्याऽन्येषां कालहननेनेति वयमपसरामो रङ्गस्थलात्। (इति निर्गतौ। ततः प्रविशतः मातृकादत्तगणनाथौ संलपन्तौ)।

मातृकादत्तः—किं भो मनोड़िन् ? किं त्वं पाणिनिमुनेर्वैशिष्ट्यं जानासि।

मनौड़०—कथन्न। तद्वैशिष्ट्यन्तु विद्वद्वेद्यम्। वैदेशिकानाम् अतिचमत्कारकृदिति सर्वजनविदितमस्ति। अहन्तु तद्वैशिष्ट्यं विलोच्य भृशमाप्यायितोऽस्मि। यः कोऽपि मां मिलति तमेव तद्बोधयामि। यदि तवावसरश्चेत्त्वामपि बोधयितुमुद्यतोऽस्मि।

मातृका०—अरे ! पाणिनेर्वैशिष्ट्यं श्रावयितुं त्वं मत्तोऽवसरं याचसे ? अहं तद्वैशिष्ट्यं श्रोतुं जीवनं समर्पितवानस्मि, जीवनमिति विजानीहि।

मनौड़ी०—तर्हि सन्नद्धो भव द्रुतम्। ... ३।१।६६ तुदा। लोप: ...

मातृका०—कर्णौ पूर्वत एव कण्डू ... णिच ... पार-
दर्शयति)

मनौड़ी०—आकुमारं यशः पाणिने ... प्रविश्य ... उपस्थितानि

विस्तृतं सर्वदिक्काल-दर्शिनं ...
सूत्रधात्विष्ट-लिङ्गैर्गणैरन्वितम् ।
वार्तिकैः पूरितं पाणिनीयं मतम् ॥

मातृका— अयि सखे पृथक् पृथक् परिष्कृत्य स्फुटं बोधय येन सर्वेषामेव वैशिष्ट्यानां यथार्थतो विशदो बोधो मे स्यादिति।

मनौड़ी—आ एवं किलेदं तर्हि शृणु—

प्रकृति-प्रत्यय-विभागकल्पनेति प्रथमं वैशिष्ट्यम्। लक्षणप्रधाना लक्ष्यसिद्धिरिति द्वितीयम्। उत्सर्गापवादविधिना लक्षणप्रवृत्त्या पाठकानां मेधावृद्धिः इति तृतीयम्। किङित् इत्याद्यनुबन्ध-प्रयोगेण सूत्रनिर्माणमिति चतुर्थम्। सूत्राणा-मधिकारानुवृत्ति-विधयार्थ-प्रक्रियेति क्रमविन्यासः पञ्चमम्। संज्ञा-परिभाषा-विधिनियमाधिकारातिदेश-निषेधेतिसप्तधा सूत्रस्थिति-विधानम इति षष्ठम्। संहिता-सम्प्रसारणेऽनङ्वृद्धि गुणाभ्यासादिप्रकरणकल्पनेति सप्तमम्। सार्वधातुकार्द्धधातु-कटिन्ङिल्लकार-कल्पनेत्यष्टमम्। आदेशागम-विकार-विकरणा-दिकल्पनेति नवमम्। सन्धिसमासनामधातु-कृदन्त-तद्धित-सुवन्ततिङन्तेति सप्तविधसिद्धिकल्पनेति दशमम्। धात्वङ्ग-कृत्तद्धिताव्ययसुप्तिङ्पदादेशाः स्थानिवत् इति स्थान्यादेश-

अनुस्वार। [illegible] [illegible]तुसूत्रगणोणादिलिङ्गानुशासनाख्यया इति विश[illegible]र्थः । [illegible] पदकोशसञ्चयार्थं पूर्वं सूत्राणां [illegible] [illegible]सूत्राधिकारानुवृत्तिविधया सूत्रार्थ-[illegible] ततः [illegible]वादपरापर-पर-नित्यान्तरङ्गापवादन्यायेन स[illegible] [illegible] पदसिद्धिरिति त्रयोदशम् । वादिप्रतिवादि-विधया विप्रतिषेधे परं कार्य्यम् १।४।२ इत्यादि-न्यायाधीश-चतुष्टयकल्पनेति चतुर्दशम् वैशिष्टयम् । यथा समुद्रमन्थनाच्चतुर्दशरत्नानि निस्सृतानि तथैव पाणिनेरपि चतुर्दशरत्नानीमानि । साधूक्तं सम्राजा महानन्देन पाणिनिना 'सागरो गर्गयां धृतः' इति

मातृका—अयि सखे मनोडिन् एको महानन्दः सम्राडेव नहि एवं व्याजहार । बहवो विद्वांसो विमुग्धमनसो बहुधा व्याहृतवन्तः सन्ति । इति जानीहि ।

मनौडी--अहो तर्हि कस्य दिनस्य कृते निगूहयसि । विवृणु कियन्ति पुरतो मे तेषां व्याहरणानि ।

मातृका--तर्हि शृणु पाश्चात्यास्तु सर्वेऽपि फ्राञ्जवप्पादयः पाणिनिप्रक्रियाविमुग्धाः सन्तः पाणिनिं स्तुवन्ति । भारतीयेष्वपि बहवो बहुधा स्तुवन्ति । एको विद्वान् केनापि विदुषा निजपुत्रव्यवहारे पृष्टोऽभूत् । तव पुत्रः सम्प्रति कीदृग् व्यवहरति इति । ततः स पाणिनि सूत्रैरेव तमुत्तरयति । अहो किं पृच्छति भवान् मत्पुत्रस्तु सम्प्रति—

पश्चिमत्स्यमृगान् हन्ति, परिपन्थं च तिष्ठति
व्रातेन जीवत्यधुना न वशः पूर्ववत् स नः ।

मनौडी--अहो ! चमत्कारः । सर्वा... ३।१।६६ तुदा... लोप... परिणतानि ।

मातृका--अपरञ्च प्रसिद्धमिदमाख्यान... णिच ... परि- पृष्टसूत्रैश्चतुर्भिः समस्यापूर्त्या... प्रविश्य ... उपस्थितानि

वृद्धो यूना निजहितकृते ...

स्त्रीपुंवश्च प्रभवति यदा तद्धि ... विनष्टम् ।

एको गोत्रे स भवति पुमान् यः कुटुम्बं बिभर्ति

सर्वस्य द्वे सुमतिकुमती सम्पदापत्तिहेतू । इति

मनौडी--अयि सखे मातृकादत्तः ! मयापि श्रुतं वर्तते यत् केनापि सुधिया "कीदृग्धीरः पदं ब्रूते को रोगी कश्च नास्तिकः कीदृक् चन्द्रं न पश्यन्ति तत्सूत्रं पाणिनेर्वद ।" इति पृष्टः कोऽपि सुधीः 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम् १।२।४५ इत्युत्तरयामास ।

मातृका--एवमेव बहवो बहुधा समुद्गिरन्ति । किं बहुना 'नास्त्यन्तो विस्तरस्य मे इति भगवद्गीतोक्तिवदिहापि वक्तव्यं स्यात् यत्

नास्तीह पारं किल पाणिनीये

वैशिष्टयबाहुल्यभृते सुपूर्णे ।

मनौडी--अयि सखे पाणिनिवैशिष्ट्यं दुरवगाहं मानवानाम् । शृणु—

नान्तं न मध्यं न पुनस्तथादिं

पश्याम्यहं पाणिनि-शब्द-शास्त्रे'

इत्येवं ब्रुवन्नहं त्वया सहैव रङ्गादपसरामि ।

इति चतुर्दशं दृश्यम् ।

अनुस्वार। विन्दु
इति विशेषार्थः।

... दशं दृश्यम्

ततः ...
(स्थानम्: ... ० वे० महाविद्यालयः। तत्र जगद्रामः छात्रः चङ्क्रम्यमाणो वक्ति।)

जगद्रामः—इहाद्यत्वे जोशीमठेऽस्माकं विद्यालयस्य वार्षिकोत्सवावसरे सर्वेऽपि च्छात्राः पाणिनीयप्रबोधनाटकाभिनये व्यापृताः श्रान्ताः सञ्जाताः। श्रूयतेऽद्य गोरक्षपुरतः श्री-पं० विष्णु-पद-पाण्डेयः, इन्द्रप्रस्थनिवासिनः श्री-दीनानाथ शास्त्रिणो मातुलपुत्री सुषमा देवी चेह श्री-बदरीनाथ यात्राप्रसङ्गतः प्राप्तौ नाटकेऽभिनय-भूमिकां ग्रहीष्यतः। अतोऽत्ररङ्गमञ्च-सज्जीकरणं मे कर्तव्यं निर्दिष्टं रङ्गशालाध्यक्षेण तज्झटिति सज्जीकृत्यापसरामि। (इति रङ्गमञ्चं सज्जीकृत्य अपसरति। ततः प्रविशतः विष्णुपदः सुषमा च)

सुषमा—अयि भो विद्वद्वागीश! भवान् पाणिनीयप्रबोधमर्मज्ञ इति भवन्त-मावदेयामि। मुन्यब्धिनवाब्ज (१९४७) मिते ख्रीष्टाब्दे यदाहं पाकिस्तानात् प्रदेशात् मूलत्राणात्–प्रपलायमाना स्व पितृपादैः सहेन्द्रप्रस्थनगरमगाम् तदा तत्र दिष्ट्या श्री-गोपालशास्त्रिणां दर्शनकेशरिणां 'पाणिनीय-प्रबोध पुस्तकं' पूज्यपादपितृदेव-प्रसादादुपलभ्य स्वयमधीतवती। ततश्च तद्बलेनैव मया पञ्चाल-राजकीय-विशारद-परीक्षा समुत्तीर्णा। तद्बलेनैवाग्रे-शास्त्रिपरीक्षा-मप्युत्तरिष्यामीति सुदृढो मे विश्वासः। शास्त्रिमहोदयेन तव

पुस्तकं छात्रमनोहरं सरलं वैज्ञा... ३।१।६६ तुदा... लोप... सूत्राणां त्यागेन पूर्वसूत्रानुव... णिच ... परि- मुत्साहो विवर्द्धते । ऋजुपारि... समवायमेवोद्भावयतीत्यलम् । प्रविश्य ... सं... ...ग्यासादे उपस्थितानि

विष्णुपदः--अयि सुषमे देवि ! ममापि पाणिनीय ... प्रचारं शृणु यदि त्वमन्यविचारं शूश्रूषसे चेत् ।

सुषमा- अयि विद्वच्छिरोमणे , इह श्री बदरीनाथ-धामनि समेत्य भवद्विधानां विदुषां विचारं श्रोतुं का हि समुत्सुका न स्यादिति निस्संङ्कोचं कथयतु भवान् ।

विष्णुपदः--सुषमे देवि ! १९५५ ख्रीष्टाब्दे यदाहं—

निवृत्ता भोगेच्छा बहुपुरुषमानो विगलितः ।
समानाः स्वर्याताः सपदि सुहृदो जीवितसमाः ॥
मनीषा सर्वस्वं वितरति परेभ्यः सुकृतये ।
क्षणाः सर्वे पुण्या य इह पुरुषाराधनकृते ।

इति वार्द्धक्यं प्रशंसन् गोरक्षपुरे–(गोरखपुरे) मण्डले हरदहीविद्यालये छात्रानध्यापयन्नासम् । तदैव पाणिनीयप्रबोध ग्रन्थरत्नं वाराणसेयसंस्कृत-प्रथम-परीक्षायाः पाठ्यग्रन्थत्वेन प्रति-ष्ठितमुपलभ्य द्रुतं छात्रेभ्यः समर्पयम् । छात्रा अपि सारल्याद् ग्रन्थरत्नं तन्मनोयोगेनाधीत्य परीक्षायां शते नवतिसंख्यानुपातं समुत्तीर्णाः । ततः प्रभृति मद्विद्यालये सर्वेऽपि छात्राः पाणिनीय–

[illegible] लघुकौमुदी-पुस्तकं न स्पृशति । इत्थं अनुस्वार। [illegible] इति विशत्[illegible]र्थः । [illegible]त । [illegible] अहमिवैव तद्ग्रन्थरत्नफलभागिति [illegible] ततः [illegible] अन्यदपि एकं वृत्तं मे स्मृतिपथमारूढं [illegible] तदा श्रावयेयम् ।

विष्णु०—अये श्रावय श्रावय किमन्यदस्माकम् इह कार्य्यमस्ति ?

सुषमा—एकदा मम पितृपादाः (एम. पी.) पार्लियामेण्टसदस्यतया दिल्लीनगरे स्थितं गोविन्दमालवीयमहोदयं केनापि कार्येण मेलितुं गताः ।

विष्णु०—ततस्ततः ।

सुषमा०—अहमपि तैः सहैवासम् । तदानीं प्रसङ्गप्राप्तम् यत् सोऽभ्यधान्मे पितृपादान् प्रति, तद्भवान् तन्मुखादेव शृणोतु । सोऽपीह श्रीबदरीनाथयात्राप्रसङ्गतो जोशीमठे समुपस्थितोऽस्ति । अस्याभिनयस्य गौरवाद् भूमिकामपि स्वीयां गृहीत्वा तिष्ठति । मत्पितृपादैः सहैवायाति गृहीतभूमिकः ।

विष्णु०—आः इदृक् सौलभ्यं कुत्र समुपलभ्यते यत् स्वयमभिनेयोऽभिनेता स्यादिति । साक्षाच्छ्रीबदरीनाथदेवप्रभावोऽयम् । (इति मालवीयः सुषमा तत्पिता च गृहीतभूमिका रङ्गे संयन्ति । श्रीविष्णुपदो दर्शको भवति । सर्वे साश्चर्य्यं पश्यन्ति)

सुषमापिता—(हस्ते पुस्तकं कृत्वा) अये मालवीयमहोदयाः पुस्तकमिदं बहुसरलं लघु च भाति । इदम् इमां स्वदुहितरम् अध्यापयितुमिच्छामि । एतस्य अन्यदपि वैशिष्ट्यं वदन्तु ।

गो०मा०—अयि शास्त्रिन् ! पाणिनीय ... ३।१।६६ तुदा ... लोप: ... दानां (मदनमोहनमालवी ... । णिच ... पार- पण्डितराज-श्रीगोपालशा ... प्रविश्य ... सं ... उपस्थतानि तद्धि पुस्तकम्—

वैज्ञानिकेन विधिना विविधैः प्रयत्नैः
पूर्णोपकारमनसा विदुषा प्रणीतम्
छात्रोपकारि सरलं समुदाहृतीनां
सङ्घान्वितं सुदृढसिद्धियुतं सुबोधम् ।

अतिदुरूहमपि शब्दशास्त्रं एतत्पुस्तकद्वारा षण्मास्यध्ययनाध्यापनक्षमं विधाय शास्त्रिवर्यैः सागरो गगर्यां सम्भृतोऽस्ति । अहञ्च तत्पुस्तकप्रचारणं पितृपादसेवाकरणं मन्ये । ततश्च सम्प्रति राष्ट्रशिक्षाधिकारिणः सर्वे स्वस्वराष्ट्रे ग्रन्थरत्नमिदं सत्कृत्य वाराणसेयसंस्कृतविश्वविद्यालयवत् पुरस्कुर्युश्चेद् (परीक्षापाठ्यग्रन्थे गृह्णीयुः) भारते व्याकरणशिक्षाकाठिन्यमपगतं स्यात् । स्याच्चानायासादेव मत्पितृ-पादसेवेति विरमामि विस्तरात्
(इति निष्क्रान्तः सुषमापित्रा सह । सुषमा तत्रैव तिष्ठति)

सुषमा—अयि विद्वन् ! श्रुतं भवता मालवीय-महोदयस्य हार्दम् ।

विष्णु०—(उत्थाय) आम् आम् ये केऽपि तद्ग्रन्थरत्नं पश्यन्ति । ते सर्वेऽपि विमुग्धाः सन्त एवमेव स्तुवन्ति । अस्तु ग्रन्थकर्तुर्मङ्गलपद्यगानेनावां विरमावः—(इत्युभौ गातः)

-प्रभृतिनरवरैर्गान्धिबोसादिभिस्तैः
...वमधिगमिते भारतीये स्वराज्ये-
... सरलसुरगिरा मालवीयोपदिष्टः
...ष्ठश्चिरमिह जयतात्पाणिनीयप्रबोधः

(इति निष्क्रान्ताः सर्वे । जवनिकापातः)

इति पञ्चदशं दृश्यम्

इति चतुर्थोऽङ्कः

—o—

३।१।६६ तुदा॰ लोप॰ ... णिच् ... पार- ... प्रविश्य ... सं॰ ... उपस्थतानि

अथ पञ्चमो

अथ षोडशं दृश्यम्

(ततः प्रविशतो लक्ष्मीप्रसादडोभालात्मारामौ संचङ्क्रम्यमाणौ)

लक्ष्मीप्रसादः—किं भो भ्रातरात्मन् ! अद्यत्वे वार्षिकोत्सवावसरेऽत्र पाणिनीयप्रबोधनाटकाभिनयो भवति। तत्र कापि भूमिका गृहीता भवता ?

आत्मारामः—कथन्न। अहं तत्र पाणिनि-प्रक्रियापक्षं गृहीतवानस्मि।

लक्ष्मीप्रसादः—किं तत्र वैशिष्ट्यमिति मनोऽडिन् बोधयास्मान् पूर्वम्। पूर्वदृश्ये वैशिष्ट्य-चतुर्दश-रत्नानि बच्चीरामेण समासतो दर्शितानि। इह तु वैशिष्ट्यविशेषं विविच्य बोधय।

आत्मा॰—अहो त्वं वैशिष्ट्य-विशेषं पृच्छसि। सर्वतोऽधिकं वैशिष्ट्य-विशेषमिममेव जानीहि पाणिनेः यत् सुबन्त तिङन्तयोः सिद्धिरेव तत्र प्राधान्यं भजते। तयोश्च सिद्धिः, अभ्यस्ताष्टाध्यायीसूत्राणां छात्राणां पुरतः स्वयमेवोपतिष्ठते।

लक्ष्मीप्रसादः—कथमिति प्रत्यक्षतः प्रबोधय कियतीम्।

आत्मा॰—शृणु सावधानः। रामेत्यस्याव्युत्पन्नपक्षे अर्थवदधातुरप्रत्ययः प्रातिपदिकम् १।२।४५ इत्यनेन, व्युत्पन्नपक्षे च कृत्तद्धित-समासाश्च १।२।४६ इत्यनेन प्रातिपदिक-संज्ञायाम् 'ङ्याप्प्रातिपदिकात्' इत्यधिकारे स्वौजसमौट्॰ इति

अनुस्वार। [illegible] सुपः १।४।१०३ इति एकवचना-
इति विशा[illegible]र्थः । [illegible] श्च १।४।१०४ इति विभक्तिसंज्ञायाश्च
[illegible] पूर्वत एव सूत्रार्थज्ञानात् प्रातिपदिकार्थ-
ततः [illegible] वचनमात्रे प्रथमा २।३।४६ इति प्रातिपदिकार्थं
सत्र [illegible] प्रथमाविभक्त्युपस्थितौ द्व्येकयोर्द्विवचनैकवचने
१।४।२२ इति एकत्व-विवक्षायां सौ सुप्तिङन्तं पदम्
१।४।१४ इति पदसंज्ञायाम् राम + सु इति स्थिते अनुबन्ध-
लोपे पदाधिकारे ससजुषोरुः ८।२।६६ इति रुत्वे अनुबन्ध-
लोपे राम + र् इति जाते विरामोऽवसानम् १।४।११०
इति अवसानसंज्ञायाम् खरवसानयोर्विसर्जनीयः ८।३।१५
इति विसर्गे रामः । एवं हि भवतीत्यादिकस्य तिङन्तस्यापि
सिद्धिर्ज्ञेया ।

लक्ष्मी प्र०—तस्या अपि प्रक्रियां प्रबोधयतु—

आत्मा०—शृणु, भू सत्तायाम् इत्यत्र भू इत्यस्य भूवादयो धातवः १।३।१
इति धातु-संज्ञायाम् धातोः ३।१।९१ इत्यधिकारे वर्तमाने
लट् ३।२।१२३ इति लटि लः कर्मणि च भावे चाकर्मकेभ्यः
३।४।६९ इति कर्त्रर्थे नियमिते अनुबन्धलोपे लः स्थाने
लस्य ३।४।७७ इत्यधिकारे तिप्तसझि० ३।४।७८ इति
तिबादि प्रत्ययोपस्थितौ तङानावात्मनेपदम् १।४।१०० इति
तङ आत्मनेपदसंज्ञायाम् शेषस्य लः परस्मैपदम् १।४।९९ इति
परस्मैपदसंज्ञायाम् शेषात्कर्तरि परस्मैपदम् १।३।७८ इति
परस्मैपदे विहिते तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः
१।४।१०१ इति प्रत्येकं त्रिकाणाम् प्रथममध्यमोत्तम-संज्ञायाम्

युष्मद्युपपदे समानाधिकरणे स[illegible] ३।१।६६ तुदा[illegible] लोप: [illegible] इति युष्मद्युपपदे मध्यमपुरुष[illegible] णिच [illegible] परि- अस्मद्युपपदे उत्तमपुरुषस्य [illegible] अन्योपपदे प्रथमपुरुषोपस्थितौ । प्रविश्य [illegible] सं[illegible] [illegible] उपस्थितानि वचनान्येकश: ३।४।१०२ इति प्रत्य[illegible] [illegible] द्विवचनबहुवचन-संज्ञायाम् च ज.तायाम् द्व्ये[illegible]र्नेक- वचने १।४।२२ इति एकत्वविवक्षायाम् तिपि अनुबन्धलोपे भू + ति इत्यत्र तिङ्शित्सार्वधातुकम् ३।४।११३ इति सार्व- धातुकसंज्ञायाम् कर्तरि शप् ३।१।६८ इति शब्विकरणे अनुबन्धलोपे शित्वात्तस्यापि सार्वधातुकसंज्ञायाम् धातोश्च, यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् १।४।१३ इति अङ्गसंज्ञायाम् सार्वधातुकार्द्धधातुकयो: ७।३।८४ इति गुणे कर्तव्ये स्थानेऽन्तरतम: १।१।५० इति उकारस्य ओकारे गुणे अवादेशे भवतीति सिध्यति ।

लक्ष्मीप्र०---सखे ! साधु त्वं वक्षि यत् पाणिनिनये पूर्वतोऽभ्यस्तसूत्राणां स्वयमेव विनिर्मितवृत्तिकानां छात्राणामग्रे सूत्राणि क्रमपरम्परया पूर्वोत्तरभावेन स्वयमेव समुपतिष्ठन्ते । इत्यत: प्रयोगसिद्धि: अनायासत एव सम्पद्यते । नास्ति तत्र सिद्धि- कृते ग्रन्थान्तरस्य प्रयोजनम् । मनोयोगेन तर्कयतु । पाणि- निना सिद्धिकृते न कोऽपि ग्रन्थो लिखित: तस्य व्याख्यान इति च व्याख्यातव्यनाम्न: ४।३।६६ तथा द्व्यजृद्ब्राह्मणर्क्प्रथ- माध्वरपुरश्चरणनामाख्याताट् ठक् ४।३।७२ इति, सूत्रा- भ्याम् सोप. तङ. कात. । इति [illegible] व्याख्यातिक इति च

[illegible] र्पाणं दृश्यते । सर्वेषामेषां पृथक् सिद्धिकृ
अनुस्वार। [illegible] पूर्वतः परतो वा न कोऽपि सम्प्रति
इति विशदार्थः । [illegible] इदमेव सूच्यते यत् सर्वेऽपि वैयाकरणाः
[illegible] अष्टाध्यायीसूत्राणि कण्ठस्थानि कृत्वा
ततः [illegible] च ज्ञातसूत्रार्थाः स्वयमनायासतः प्रयोगसिद्धि
[illegible] कुर्वान्ति स्म । प्रयोगसिद्धिकृते ग्रन्थस्य काप्यावश्यकतैव न
प्रतीयते स्म । इति आवश्यकतैवाविष्कारजननीति न्याया-
दावश्यकताभावादाविष्कारोऽपि नाभूत् प्रयोगसिद्धिकृते
ग्रन्थान्तरस्येति निष्कर्षः ।

इयं प्रयोगसिद्धिप्रथातु लक्ष्यप्रधानं रूपावताराभिधं
वैदिकसूत्रापहारिणं प्रक्रिया-ग्रन्थं प्रणीय बौद्धविदुषा
महापण्डितेन धर्मकीर्तिना प्रवर्तितेति सोपपत्ति प्रपञ्चितं
विद्यते पाणिनीयनाटके तत्रैव द्रष्टव्यम् । ततः प्रभृत्येवेह
प्रयोगसिद्धिकृद्ग्रन्थप्रणयनपरम्परा गण्डस्योपरि विस्फोट-
कवत् प्रवर्द्धमाना दृश्यते । यस्या वागुरायां पतिताश्छात्रा
मूलभूतामष्टाध्यायीमपि विस्मृत्य प्रक्रियाग्रन्थेषु सूत्रा-
धोनिर्दिष्टां वृत्तिं (सूत्रार्थम्) घोषं घोषं कण्ठं शोषयन्ति ।
फलञ्च मेधाविनाशं स्मृतिशक्तिविलोपं कूपमण्डूकत्वोपलब्धिं
लभन्त इत्यनर्थपरम्पराऽसह्याऽस्माकम् । अष्टाध्यायीमूला
लक्षणप्रधाना प्रयोगसिद्धिप्रथा तु सर्वथोच्छिन्नैव
दृश्यतेऽधुना ।

आत्मा०—अयि सखे ! इयं तु त्वया नूतना गवेषणा कृता दृश्यते ।
सत्यमेवेदमुद्गिरसि । इतः पूर्वं तु एका माधवीया धातु

वृत्तिरेव लक्ष्यप्रधानो [illegible] ३।१।६६ तुदा[illegible] लोपः [illegible] केवलम् धातुतो जायमान [illegible] णिच् [illegible] ना परिविद्यते । नास्ति अपि [illegible] प्रविश्य [illegible] सं[illegible] क्षीरतरङ्गिणी अपि तादृशी [illegible] यामपि [illegible] उपस्थितानि । जगदम्बाप्रसादबच्चीरामगैरोलौ सम[illegible] [illegible] [illegible] परामो रङ्गात् । (निर्गतौ)

(ततः प्रविशतः जगदम्बाप्रसादबच्चीरामगैरोलौ परस्परं संलपन्तौ)

जगदम्बाप्र०—अयि सखे बच्चीराम ! पूर्वम् आत्मारामः प्राधान्येन सुबन्ततिङन्तसिद्धिरितिसिद्धिद्वयमब्रवीत् । तत्र किमन्या अपि सिद्धयः सन्ति, यद्द्वयोरेव स प्राधान्यं ब्रूते ?

बच्चीरामः—कथन्न, सिद्धयस्तु सप्तधा सन्त्येव ।

जगदम्बाप्र०—कास्ताः ।

बच्चीरामः—सखे ! पद्येनैव संक्षेपतः शृणु—

सुबन्तस्य तिङन्तस्य सन्धितद्धितयोरपि ।
नामधातोः कृदन्तस्य समासस्येति सप्तधा ॥

स्त्रीप्रत्ययसिद्धिस्तु नगण्यैवेति न गृह्यते । णिजन्तादिप्रक्रियासिद्धिरपि तु सनाद्यन्ता धातवः ३।१।३२ इति धातु-संज्ञया तिङन्तसिद्धिरेवेति न पृथग् गणिता ।

जगदम्बाप्र०—अस्तु, आसु प्राधान्यं भजन्त्योः सुबन्ततिङन्तसिद्धयोरेव प्रकारं परिष्कृत्य मां पुनर्बोधय ।

अनुस्वार। [illegible] [illegible]तसिद्धिषु प्रथमतः सुपः परिष्कार्य्या इति विशा[illegible]र्थः । [illegible]ः । अतोऽहं पूर्वम् सुपं समूलं परिष्क- [illegible] [illegible] [illegible] यथाहि—

ततः [illegible]				सुपां परिष्कृतं रूपम्		
	[illegible]	[illegible]	बहु०	एक०	द्वि०	बहु०
प्र०	सु	औ	जस्	स	औ	अः
द्वि०	अम्	औट	शस	अम्	औ	अः
तृ०	टा	भ्याम्	भिस्	आ	भ्याम्	भिः
च०	ङे	भ्याम्	भ्यस्	ए	भ्याम्	भ्यः
पं०	ङसि	भ्याम्	भ्यस्	अः	भ्याम्	भ्यः
ष०	ङस्	ओस	आम्	अः	ओः	आम्
स०	ङि	ओस्	सुप्	इ	ओः	सु
सम्बो०	सु	औ	जस्	स्	औ	अः

इत्युभयमपि सम्यगभ्यसनीयम् । ततः प्रत्याहार-शब्दानाम् अण् अल्, अक्, अच्, हल्, हश्, खर, इत्यादीनामेव रूपाणि पूर्वं स्वयं पूर्वोक्तेन प्रकारेण प्रातिपदिकसंज्ञया स्वादिविभक्तिनियोगेन चालनीयानि—

जगदम्बा— विभक्तीनां परिष्कृतं रूपं कथं निर्मीयते इति तु त्वया नोक्तम् ?

बच्चीरामः - अहो, तदपि शृणु, सु, ङसि इत्यनयोः अचः उपदेशोऽजनुनासिक इत् १।३।२ इत्यनेन; जश्, टा इत्यनयोः आदि चवर्ग टवर्गयोः चुटू १।३।७ इत्यनेन; औट्, सुप् इत्यनयोरन्त्य-हलोः हलन्त्यम् १।३।३ इत्यनेन; शश्, ङे, ङसि, ङस्, ङि इत्येतेषाम् आदि शकार-ङकारयोः लशक्वतद्धिते

१।३।८ इत्यनेन च इत् सं ... ३।१।६६ तुदा ... लोपः इत्यनेन सर्वेषां लोपे सस्य रु... णिच् ... परिष्कृतं रूपं जायते।

जगदम्बा प्र० — सखे! सम्प्रति रूपाणि तु स्व... उपस्थितानि भवन्ति। परन्तु अण् + स् इत्यत्र विभक्तिगं ... रं प्रथमोपस्थितं सकारं किं करोमि?

बच्चीरामः — तत्तु सर्वत्रैव हलन्त-शब्देषु स्वभ्रातरं हलन्तरं दृष्ट्वा प्रपलायते। ततश्च प्रकृतिवर्गान्तरं प्रथमं तृतीयं वा विकल्पेन तृतीयं प्रथमं वा भूत्वा तिष्ठति। तदर्थं पाणिनीयं सूत्रं हल्ङ्याब्भ्यो दीर्घात्० ६।१।६८ झलां जशोऽन्ते ८।२।३६ वाऽवसाने ८।४।५६ इति वर्तते।

जगदम्बा प्र० — अस्तु, तर्हि अण् शब्दे तु प्रथमैकवचने केवलं लोप एव सकारस्य स्यात्, तथाहि—

अण्	अणौ	अणः	प्रथमा
अणम्	अणौ	अणः	द्वितीया
अणा	अण्भ्याम्	अण्भिः	तृतीया
अणे	अण्भ्याम्	अण्भ्यः	चतुर्थी
अणः	अण्भ्याम्	अण्भ्यः	पञ्चमी
अणः	अणोः	अणाम्	षष्ठी
अणि	अणोः	अणसु	सप्तमी
हे अण	हे अणौ	हे अणः	सम्बोधनम्

इत्थं हि सर्वेषां हलन्तानां रूपाणि चालयितुं शक्यन्ते।

बच्चीरामः — अथ किं कुत्रचित् प्रकृतिस्थं किञ्चित्कार्यं विभक्तिस्थ-

अनुस्वार। ...वन् ...मित्तं परिवर्तनीयम् भवति। तदनुसारं इति विशदार्थः। रूपं ब्रूहि।

जगदम्बा... शृणु—

अक् अग्	अकौ	अकः	प्रथमा
अकम्	अकौ	अकः	द्वितीया
अका	अग्भ्याम्	अग्भिः	तृतीया
अके	अग्भ्याम्	अग्भ्यः	चतुर्थी
अकः	अग्भ्याम्	अग्भ्यः	पञ्चमी
अकः	अकोः	अकाम्	षष्ठी
अकि	अकोः	अक्षु	सप्तमी
हे अक् हे अग्	हे अकौ	हे अकः	सम्बोधनम् इति--

वच्चोरामः—अयि ! सखे जगदम्बाप्रसाद ! सम्प्रति हरिकृष्ण-गोपालौ भूमिकां गृहीत्वा तिष्ठतः। तयोरप्यवसरो देय इत्यपसराव आवाम् (अपसरतस्तौ रङ्गस्थलात् सर्वे निष्क्रान्ता जवनिकापातः)

षोडशं दृश्यं समाप्तम्।

—:*:—

३।१।६६ तुदा।
णिच

अथ सप्तदशं

(ततो हरिकृष्णथपलियाल-गोपालदत्तौ प्रविश्य परस्परं संलपतः)

हरिकृष्ण०—अयि सखे गोपालदत्त ! श्रूयतेऽधुना पाणिनीय-प्रबोधनाटके तिङन्त-रूपाणि चलन्ति । तर्हि मां तानि बोधय

गोपालः—अये ! तत्र किं बोधनीयम् । प्रथमं प्रत्ययान् वशीकुरु । रूपाणि तु स्वयमागच्छन्ति ।

हरिकृष्ण०—तत्कथम् इति विस्तराद् बोधय ।

गोपाल०– शृणु सावधानः तिङन्त-रूप-सिद्धौ सार्वधातुकलकाराणां लट् लङ्-लोट् विधिलिङ् इत्येतेषां चतुर्णां लकाराणां सार्व-धातुक-प्रत्ययाः पूर्वं ग्राह्याः । ततस्तैः सह धातुप्रत्यययो-र्मध्ये पतितस्य विकरणस्य योगः कर्तव्यः तदनन्तरंपिन्ङिद्-भेदतो गुणागुणविवेकेन रूपाणि चालनीयानि ।

हरिकृष्ण०—अस्तु, मया त्वदुक्तं सर्वमवगतम्, प्रत्ययान् ब्रूहि साम्प्रतम् ।

गोपाल० शृणु, अदन्त-विकरणाः चत्वारो गणाः । भ्वादिः, दिवादिः, तुदादिः, चुरादिस्तथा सर्वेऽपि प्रक्रिया-प्रत्ययान्तधातवः कण्ड्वाद्यन्ताः भावकर्मणोः यग्विकरणा धातवः । तेषां सर्वेषाम् उभयोः परस्मैपदात्मनेपदयोः क्रमेण अष्टादश-प्रत्ययाः भवन्ति । तत्र प्रथमः, मध्यमः, उत्तमः, इति त्रयः पुरुषाः एकवचनं, द्विवचनं, बहुवचनं, इति वचनानि च क्रमेण भवन्ति । तथाहि—तेषां सर्वेषाम् अदन्तविकरण-गणानां प्रत्ययाः ।

अनुस्वार। [illegible]व पदे — लटः परस्मैपदे

[illegible]ति	द्विशे	[illegible]०	बहु०	एक०	द्वि०	बहु०
प्र०पु०	ते	इते	अन्ते	ति	तः	अन्ति
म०पु०	से	इथे	ध्वे	सि	थः	थ
उ०पु०	ए	वहे	महे	मि	वः	मः

लङि परस्मैपदे— लङि आत्मनेपदे—

	एक०	द्वि०	बहु०	एक०	द्वि०	बहु०
प्र०पु०	त्	ताम्	अन्	त	इताम्	अन्त
म०पु०	स्	तम्	त	थाः	इथाम्	ध्वम्
उ०पु०	अम्	व	म	इ	वहि	महि

लोटि परस्मैपदे— लोटि आत्मने पदे—

	एक०	द्वि०	बहु०	एक०	द्वि०	बहु०
प्र०पु०	तु, तात्	ताम्	अन्तु	ताम्	इताम्	अन्ताम्
म०पु०	हि, तात्	तम्	त	स्व	इथाम्	ध्वम्
उ०पु०	आनि	आव	आम	ऐ	आवहै	आमहै

लिङ् (विधि०) परस्मैपदे लिङ् (विधि०) आत्मने पदे

	एक०	द्वि०	बहु०	एक०	द्वि०	बहु०
प्र०पु०	इत्	इताम्	इयुः	ईत	ईयाताम्	ईरन्
म०प्र०	इः	इतम्	इत	ईथाः	ईयाथाम्	ईध्वम्
उ०प्र०	इयम्	इव	इम	ईय	ईवहि	ईमहि

एतेषु सर्वत्रैव संहिताकार्य्यमावश्यकम्। तत्र अतो गुणे ६।१।९७ इत्यपवादसूत्रम्। अकः सवर्णे दीर्घः ६।१।१०१ इति परमपि अपोद्य स्वयम् प्रवर्तते। येन भव + अन्ति भवन्ति इति रूपं भवति। विकरण-सूत्राणि तु कर्तरि

शप् ३।१।६८ दिवादिभ्यः श्यन् ३।१।६९ तुदादिभ्यः शः ३।१।७७ सत्यापपाश० चुरादिभ्यो णिच् ३।१२५ इति णिचि यथोचितगुणवृद्धिकार्य्यानन्तरमयादिकार्य्ये सनाद्यन्ता धातवः ३।१।३२ इति णिजन्त-धातुत्वं सम्पाद्य सर्वत्रैव सार्वधातुक-लकारेषु कर्त्तरि शप् ३।१।६८ इति शपि पुन-र्गुणे अयादेशे रूपं चालनीयम्। एवम् हि हेतुमति च ३ १।२६ इति णिचि अपि कृत्यम। दिवादौ हलि च ८।२। ७७ इति दीर्घविशेषः। अदन्तविकरणकगणेषु प्रकृतिप्रत्यय-कार्य्यमपि किञ्चिद् भवत्येव।

हरिकृष्ण०—तदपि विशदय—

गोपालः—उत्तमपुरुषप्रत्यये यञादौ अतो दीर्घो यञि ७।३।१०० इति प्रत्यये दीर्घो ज्ञेयः। आत्मने पदे (तङि) प्रथममध्यम पुरुषयोर्द्विवचने आतो ङितः ७।२।८१ इति प्रत्ययाकारस्य इकारे इते इथे इति प्रत्ययरूपम्। विधिलिङि अतोयेयः ७।२।८० इति यास इयादेशे लोपो व्योर्वलि ६।१।६६ इति यलोपे च इत् इताम् इत्यादि प्रत्ययरूपम्।

हरिकृष्ण०—सखे गोपाल ! मूलप्रत्ययास्तु सर्वे एकविधा एव। प्रतिलकारं त्वया भिन्ना भिन्नाः कथं निर्दिष्टाः ?

गोपालः—सूत्रैः प्रत्यया अपि निर्मीयन्ते। परन्तु मया सारल्याद् विना-सूत्रनियोगम् केवलं तत्तल्लकारप्रत्यया उक्ताः। त्वया तान् प्रकृत्या नियोज्य आवश्यककार्य्यं च दर्शयता शुद्धरूपाण्ये-वोच्यन्ताम्।

हरिकृष्ण०—अस्तु, अहं त्वदुक्त-दिशा रूपाणि तु सर्वाणि चालयितुं समर्थोऽस्मि। किन्तु चतुर्षु सार्वधातुक-लकारेषु चतुर्षु च गणेषु परस्मैपदात्मनेपदेषु प्रथम-पुरुष-रूपाण्येव कथयित्वा विरमामि। अग्रे त्वया स्वयं बोध्यानि। तथाहि-भूधातोर्यथा लटि परस्मैपदे—भवति, भवतः, भवन्ति। लङि—अभवत्, अभवताम्, अभवन्। लोटि—भवतु, भवतात्, भवताम् भवन्तु। विधि लिङि—भवेत्, भवेताम्, भवेयुः। तथैव भाष् धातोः आत्मनेपदे लटि—भाषते, भाषेते भाषन्ते। लङि—अभाषत, अभाषेताम्, अभाषन्त। लोटि—भाषताम् भाषेताम्, भाषन्ताम्। विधि लिङि—भाषेत, भाषेयाताम् भाषेरन्। इति। दिवादौ च दिव्धातोः परस्मैपदे लटि—दीव्यति, दीव्यतः, दीव्यन्ति। लङि—अदीव्यत्, अदीव्यताम् अदीव्यन्। लोटि—दीव्यतु, दीव्यतात्, दीव्यताम्, दीव्यन्तु विधिलिङि—दीव्येत्, दीव्येताम्, दीव्येयुः। दिवादौ विद् धातोरात्मनेपदे लटि—विद्यते, विद्येते, विद्यन्ते। लङि—अविद्यत, अविद्येताम्, अविद्यन्त। लोटि—विद्यताम्, विद्येताम्, विद्यन्ताम्। विधि लिङि—विद्येत, विद्येयाताम्, विद्येरन्। तुदादौ तुद्धातोरुभयपदे रूपाणि—तत्र परस्मैपदे लटि-तुदति, तुदतः, तुदन्ति। लङि-अतुदत्, अतुदताम्, अतुदन् लोटि—तुदतु, तुदतात्, तुदताम्, तुदन्तु। विधि लिङि—तुदेत्, तुदेताम्, तुदेयुः। आत्मनेपदे लटि-तुदते, तुदेते, तुदन्ते लङि अतुदत, अतुदेताम्, अतुदन्त। लोटि—तुदताम्, तुदेताम्, तुदन्ताम्। विधि लिङि—तुदेत, तुदेयाताम्, तुदेरन्। चुरादौ चोरिधातोरुभयपदयो रूपाणि। परस्मैपदे लटि—

चोरयति, चोरयतः, चोरयन्ति। लङि—अचोरयत्, अचोरयताम्, अचोरयन्,। लोटि—चोरयतु, चोरयतात्, चोरयताम्, चोरयन्तु। वि. लि.– चोरयेत्, चोरयेताम, चोरयेयुः आत्मनेपदे लटि—चोरयते, चोरयेते, चोरयन्ते। लङि—अचोरयत, अचोरयेताम्, अचोरयन्त। लोटि—चोरयताम् चोरयेताम्,चोरयन्ताम्, विधि लिङि-चोरयेत, चोरयेयाताम्, चोरयेरन्। एवमेव णिजादि-सर्वप्रक्रिया-प्रत्यययोगेन धातु-निर्माणं कृत्वा पुनः धातुत्वात् लडादि-प्रत्यय-योगे भावयति बुभूषति, वोभूयते, बोभवीति, वोभोति, नामधातोः च सुबन्ताद् धातु-निर्माणे तथैव पुत्रीयति, कष्टायते, कण्ड्वादौ कण्डूयति, कण्डूयते भावकर्मणि भूयते, पठ्यते इत्यादि-रूपाणि ज्ञेयानि। इत्येवम् सर्वाणि सार्वधातुकलकाररूपाणि अकारान्त-विकरणवद् गणेषु अभिहितानि। अतः परं किमवशिष्यते तत् त्वं ब्रूहि।

गोपालः—अयि सखे ! विविधविकरणानां षण्णां गणानां प्रत्यय-योगेन विकरण-योगेन च सार्वधातुक-रूपाणि चालयितुमर्हसि ?

हरिकृष्णः—नहि भोः वयं श्रान्ता इति कार्यमिदं भीमसिंह-दुर्लभसिंहाभ्यां सम्पादनीयम्। वयं साम्प्रतमपसरामो रङ्गात्

(निर्गतौ ततः भीमसिंहो दुर्लभसिंहश्च परस्परं संलपन्तौ प्रविशतः)

भीमः—अये मित्र दुर्लभ ! त्वम् गोपालत्यक्तानाम् अवशिष्टानां षण्णां गणानां सार्व-धातुकलकाररूपाणि चालयितुम् पूर्वं तेषां प्रत्ययान् ब्रूहि। समये विशेषकार्यमपि वक्तव्यम् त्वया।

दुर्लभः—शृणु सखे भीम ! अहं एवं लकारक्रमेण तान् सार्वधातुक-

प्रत्ययान् ब्रवीमि उभयोरपि पदयोः । येन प्रकारेण रूपचालनमतिसरलं स्यात् ।

भम--बाढं बाढमुच्यताम्—

दुर्लभ--परस्मैपदे लटि आत्मनेपदे लटि

	एक०	द्वि०	बहु०	एक०	द्वि०	बहु०
प्र० पु०	ति	तः	अन्ति	ते	आते	अते
म० पु०	सि	थः	थ	से	आथे	ध्वे
उ० पु०	मि	वः	मः	ए	वहे	महे

परस्मैपदे लङि— आत्मनेपदे लङि

प्र०पु०	त्	ताम्	अन्	त	आताम्	अत
म०पु०	स	तम्	त	थाः	आथाम्	ध्वम्
उ०पु०	अम्	व	म	इ	वहि	महि

परस्मैपदे लोटि—

(अदन्तविकरणवद् एव इहापि प्रत्यया ज्ञेयाः)

आत्मनेपदे लोटि

प्र०पु०	ताम्	आताम्	अताम्
म०पु०	स्व	आथास्	ध्वम्
उ०पु०	ऐ	आवहै	आमहै

परस्मैपदे लिङि—

प्र०पु०	यात्	याताम्	युः
म०पु०	याः	यातम्	यात
उ० पु०	याम्	याव	याम

आत्मनेपदे लिङि—

(अदन्त-विकरणवद् एव प्रत्यया इहापि ज्ञेयाः)

भीमः—अस्तु, मया सर्वे प्रत्यया ज्ञाताः सम्प्रति रूपग्रहणे नास्ति मे विलम्बः । त्वं तत्तद्गणानां केवलं विकरणकृत्यं ब्रूहि—

दुर्लभः—शृणु सखे ! सावधानः, क्रमशोऽहं विकरणकार्यं ब्रवीमि—अदादौ अदिप्रभृतिभ्यः शपः २।४।७२ इति विकरणस्य लुक् ज्ञेयः, जुहोत्यादौ, जुहोत्यादिभ्यः श्लुः २।४।७५ इति शपः श्लुः भवति। ततः श्लौ ६।१।१० इति द्वित्वे पूर्वोऽभ्यासः ६।१।४ इति अभ्यास-संज्ञायां हलादिः शेषः ७।४।६० इति आदेर्हलः शेषेऽन्य हलो लोपे ह्रस्वादि-कार्यं रूपाणि चालनीयानि। लटि लोटि च झेः अदभ्यस्तात् ७।१।४ इति अति कर्तव्ये उभे अभ्यस्तम् ६।१।५ इति अभ्यस्त-संज्ञा कार्य्या। लङि च सिजभ्यस्तविदिभ्यश्च ३।४।१०९ (ङितः) इति झेः जुसि, जुसि च ७।३।८३ इति गुणे अयादि-कार्यं रूपाणि ग्राह्याणि। अन्यच्च विशेषकार्यं त्वया स्वयमूह्यम्। स्वादौ स्वादिभ्यः श्नुः ३।१।७३ इति श्नुःविकरणम्। रुधादौ रुधादिभ्यः श्नम् ३।१।७८ इति श्नम्। तनादौ तनादिकृञ्भ्य उः ३।१।७९ इति उः। क्र्यादौ क्र्यादिभ्यः श्नाः ३।१।८१ इति श्ना विकरणम्। इत्येवं सर्वत्र विकरणेषु गुणागुण-विवेकेन रूपाणि ग्राह्याणि। अद भक्षणे धातोस्तु लङि, अदः सर्वेषाम् ७।३। • इति अपृक्तस्य अडागमोऽपि ज्ञेयः। एवं सर्वत्र विशेषकृत्यम् त्वया स्वय ह्यम्।

भीमः—अस्तु, तर्हि शृणु अद् धातोः लटि परस्मैपदे रूपाणि—अत्ति अत्तः अदन्ति। लङि—आदत् आत्ताम् आदन्। लोटि—अत्तु (अत्तात्) अत्ताम् अदन्तु। विधिलिङि अद्यात् अद्याताम् अद्युः। ब्रूञ् व्यक्तायां वाचि। धातोः उभयपदित्वात् परस्मैपदे लटि—ब्रुव ईट् ७।३।९३ (पिति हलि) इति ईटि रूपाणि चालनीयानि। ब्रवीति ब्रूतः ब्रुवन्ति। आत्मनेपदे लटि—ब्रूते ब्रुवाते ब्रुवते। लङि परस्मैपदे अब्रवीत् अब्रूताम् अब्रुवन्। आत्मने-

पदे लङि अब्रूत अब्रुवाताम् अब्रुवत। लोटि परस्मैपदे ब्रवीतु (ब्रूतात्) ब्रूताम् ब्रुवन्तु। लोटि आत्मनेपदे-ब्रूताम् ब्रुवाताम् ब्रुवताम्। विधिलिङि परस्मैपदे-ब्रूयात् ब्रूयाताम् ब्रूयुः। विधिलिङि आत्मनेपदे-ब्रुवीत ब्रुवीयाताम् ब्रुवीरन् हु=दानादनयोः। इति हुधातोः जुहोत्यादौ लटि परस्मैपदे-जुहोति, जुहुतः जुह्वति। अत्र इको यणचि ६।१।७७ इति प्राप्तस्य यणः प्रतिषेधेन अचि श्नु धातु० इति प्राप्तस्येयङः हुश्नुवोः सार्वधातुके ६।४।८७ इति यणि रूपसिद्धिर्ज्ञेया। परस्मैपदे—लङि अजुहोत् अजुहुताम् अजुहवुः। परस्मैपदे लोटि-जुहोतु (जुहुतात्) जुहुताम् जुह्वतु इति-विधि लिङि जुहुयात् जुहुयाताम्, जुहुयुः। उभयपदिनो डुदाञ् दाने इति दाधातोः परस्मैपदे लटि-ददाति दत्तः ददति। लङि-अददात् अदत्ताम् अददुः लोटि—ददातु (दत्तात्) दत्ताम् ददतु। विधिलिङि—दद्यात् दद्याताम् दद्युः आत्मनेपदे लटि—दत्ते, ददाते ददते, लङि—अदत्त, अददाताम् अददत, लोटि—दत्ताम्, ददाताम्, ददताम्, विधिलिङि—ददीत, ददीयाताम्, ददीरन्। स्वादौ षुञ् अभिषवे इति सु धातोः परस्मैपदे लटि—सुनोति, सुनुतः सुन्वन्ति, लङि—असुनोत् असुनुताम् असुन्वन्, लोटि—सुनोतु (सुनुतात्) सुनुताम् सुन्वन्तु, विधिलिङि—सुनुयात् सुनुयाताम् सुनुयुः। आत्मनेपदे लटि—सुनुते, सुन्वाते सुन्वते लङि-असुनुत असुन्वाताम् असुन्वत, लोटि-सुनुताम् सुन्वाताम्, सुन्वताम्, विधिलिङि—सुन्वीत सुन्वीयाताम् सुन्वीरन् रुधादौ रुधिर् आवरणे धातोः परस्मैपदे लटि-रुणद्धि रुन्धः रुन्धन्ति। लङि-अरुणत्, अरुणद् अरुन्धाम् अरुन्धन्, लोटि-

रुणद्धु, (रुन्धात्,) रुन्धाम्, रुन्धन्तु। विधिलिङि—रुन्ध्यात्, रुन्ध्याताम्. रुन्ध्युः। आत्मनेपदेलटि—रुन्धे रुन्धाते, रुन्धते लङि—अरुन्ध, अरुन्धाताम् अरुन्धत, लोटि—रुन्धाम्, रुन्धाताम् रुन्धताम्, विधिलिङि—रुन्धीत रुन्धीयाताम् रुन्धीरन्। तनादौ उभयपदे डुकृञ् करणे इति कृधातोः लटि—करोति कुरुतः कुर्वन्ति। लङि—अकरोत् अकुरुताम् अकुर्वन्, लोटि-करोतु (कुरुतात्) कुरुताम् कुर्वन्तु विधिलिङि कुर्यात् कुर्य्याताम्, कुर्य्युः, आत्मनेपदे, लटि—कुरुते, कुर्वाते कुर्वते। लङि—अकुरुत अकुर्वाताम् अकुर्वत, लोटि-कुरुताम् कुर्वाताम् कुर्वताम्। विधिलिङि-कुर्वीत कुर्वीयाताम् कुर्वीरन्। क्र्यादौ डुक्रीञ् द्रव्यविनिमये इति क्रीधातोः परस्मैपदे लटि-क्रीणाति, क्रीणीतः क्रीणन्ति। लङि—अक्रीणात्, अक्रीणीताम् अक्रीणन्। लोटि क्रीणातु (क्रीणीतात्) क्रीणीताम् क्रीणन्तु विधिलिङि—क्रीणीयात् क्रीणीयाताम् क्रीणीयुः। आत्मनेपदे लटि-क्रीणीते क्रीणाते क्रीणते। लङि-अक्रीणीत अक्रीणाताम् अक्रीणत लोटि—क्रीणीताम् क्रीणाताम् क्रीणताम्. विधिलिङि—क्रीणीत, क्रीणीयाताम्, क्रीणीरन्।

दुर्लभः—किं भो भीम ! त्वया सार्वधातुक-लकाररूपाणि तु गणभेदतः साधु अभिहितानि। किमार्धधातुकलकाररूपाण्यपि कथयितुमुत्सुकायसे ?

भीमः—नहि भोः ! अहन्तु बहु श्रान्तोऽस्मि, त्वमपि श्रान्तो दृश्यसे। अतः विश्रम्यताम् बहुभाषण-व्यापारात्। स्मर्य्यताम् वाग्भटीयपद्यम्।

अत्यन्तजागराध्वस्त्री-हास्य-भाष्यादि-साहसम् ।
गजं सिंह इवाकर्षन् भञ्जन्नति विनश्यति ॥ इति
अतो भारोऽयं गणनाथभक्तरामयोरुपरि त्यज्यताम् (इतिनिष्क्रान्तौ)
(इति सप्तदशं दृश्यं समाप्तम्)

अथ अष्टादशं दृश्यम्

(ततः प्रविशतो रामनाथ-मनोडि-भक्तराम-गैरोलौ संलपन्तौ)

रामनाथः—सखे भक्तराम ! त्वमार्द्धधातुकलकारान् जानासि ? भीमेन भ्रात्रा यो हि भारोऽस्मासु पातितोऽस्ति तत्सम्पादनम् अर्थात् आर्द्धधातुकलकारकृत्यं वयं कुर्मः ।

भक्तरामः—साधु सखे मनोडिन् ! साधु, तर्हि त्वं पूर्वम् आर्द्धधातुक-लकारान् ब्रूहि । के ते ?

रामनाथः—शृणु, प्रयोग-साधन क्रमेण ब्रवीमि—लृट् लृङ् लुट् लुङ् लिट् लिङ् । अत्र लिङा आशीर्लिङ् ज्ञेयः ।

भक्तरामः—कथम् इमे लकारा आर्द्धधातुकाः कथ्यन्ते ? इति तु त्वं जानास्येव । अतश्च आर्द्धधातुकत्वमेषामनुवदन् पूर्वं प्रत्ययान् ततोऽग्रे रूपाणि च ब्रूहि ।

रामनाथः—वाढम् वाढम्, शृणु । तिङ्शितोः सार्वधातुकसंज्ञायाम् तद्भिन्नाः सर्वेऽपि आर्द्धधातुकं शेषः ३।४।११४इति धातोर्विहिताः प्रत्यया आर्द्धधातुका भवन्ति।यथा स्यतासी लृलुटोः

३।१।३३ इति लृड् लृङोः स्यः। लुटि च तासिः। च्लि लुङि ३।१।४३ इति लुङि च्लि। इमे त्रयोऽपि विकरण-प्रत्ययाः शिड्भिन्ना इति आर्द्धधातुकत्वं लभन्ते। लिट् च ३।४।११५ लिङाशिषि ३।४।११६ इति सूत्राभ्यां लिडाशीर्लिङोः आर्द्धधातुकत्वम् बोध्यम्। इत्थमिमे षडपि लकारा आर्द्धधातुकाः कथ्यन्ते। चत्वारो हि विकरणप्रत्ययानामार्द्धधातुकतया द्वौ च साक्षादेव सूत्रोक्तौ आर्द्धधातुकौ इति निष्कर्षः।

भक्तरामः—अस्तु, तर्हि एतेषां लकाराणां प्रत्ययान् क्रमशो ब्रूहि।

रामनाथः—शृणु सखे!

परस्मैपदे लृटि— आत्मने पदे लृटि—

	एक	द्वि०	बहु	एक	द्वि०	बहु०
प्र० पु०	स्यति	स्यतः	स्यन्ति	स्यते	स्येते	स्यन्ते
म० पु०	स्यसि	स्यथः	स्यथ	स्यसे	स्येथे	स्यध्वे
उ० पु०	स्यामि	स्यावः	स्यामः	स्ये	स्यावहे	स्यामहे

परस्मै पदे लृङि— आत्मने पदे लृङि—

	एक०	द्वि०	बहु०	एक०	द्वि०	बहु०
प्र० पु०	स्यत्	स्यताम्	स्यन्	स्यत	स्येताम्	स्यन्त
म० पु०	स्यः	स्यतम्	स्यत	स्यथाः	स्येथाम्	स्यध्वम्
उ० पु०	स्यम्	स्याव	स्याम	स्ये	स्यावहि	स्यामहि

परस्मैपदे लुटि— आत्मनेपदे लुटि—

	एक०	द्वि०	बहु०	एक०	द्वि०	बहु०
प्र० पु०	ता	तारौ	तारः	ता	तारौ	तारः
म० पु०	तासि	तास्थः	तास्थ	तासे	तसाथे	ताध्वे
उ० पु०	तास्मि	तास्वः	तास्मः	ताहे	तास्वहे	तास्महे

प०पदे लुङि सेट् धातोः प्रत्ययाः । आ०पदे लुङि सेट् धातोः प्रत्ययाः ।

	एक०	द्वि०	बहु०	एक०	द्वि०	बहु०
प्र०पु०	ईत्	इष्टाम्	इषुः	इष्ट	इषाताम्	इषत
म०पु०	ईः	इष्टम्	इष्ट	इष्ठाः	इषाथाम्	इढ्वम्
उ०पु०	इषम्	इष्व	इष्म	इषि	इष्वहि	इष्महि

प०पदे लुङि अनिट् धातोः प्रत्ययाः। आ०पदे लुङि अनिट् धातोः प्रत्ययाः

	एक०	द्वि०	बहु०	एक०	द्वि०	बहु०
प्र०पु०	सीत्	स्ताम्	सुः	स्त	साताम्	सत
म०पु०	सीः	स्तम्	स्त	स्थाः	साथाम्	ध्वम्
उ०पु०	सम्	स्व	स्म	सि	स्वहि	स्महि

क्वचित्तु सिज्लुगादिजाते लङ् प्रत्यया एव यथायथं प्रयुज्यन्ते ।

परस्मैपदे लिटि— आत्मनेपदे लिटि—

	एक०	द्वि०	बहु०	एक०	द्वि०	बहु०
प्र०पु०	अ(णल्)	अतुः	उः	ए	आते	इरे
म०पु०	थ	अथुः	अ	से	आथे	ध्वे
उ०पु०	अ (णल्)	व	म	ए	वहे	महे

परस्मैपदे आशीर्लिङि— आत्मनेपदे आशीर्लिङि—

	एक०	द्वि०	बहु०	एक०	द्वि०	बहु०
प्र०पु०	यात्	यास्ताम्	यासुः	सीष्ट	सीयास्ताम्	सीरन्
म०पु०	याः	यास्तम्	यास्त	सीष्ठाः	सीयास्थाम्	सीध्वम्
उ०पु०	यासम्	यास्व	यास्म	सीय	सीवहि	सीमहि

भक्तरामः—सखे मनोडिन् ! एषु लकारेषु विकरणानि तु त्वया प्रायः प्रत्ययेष्वेव निवेशितानि । अन्यच्च नास्ति सम्प्रति धातूनां गणभेदज्ञानस्य प्रयोजनम् ।सम्प्रति तु केवलम् सेड्निड्वेड्

धातुज्ञानेनैवार्धधातुकलकारेषु रूपाणि चाल्यन्ते। तत्रापि आर्द्धधातुकस्येड्वलादेः ७।२।३५ इति इड्विधानार्थं वलादि-प्रत्यया एव ग्राह्याः।

रामनाथः—अस्तु के धातवः सेटः के चानिट इति ज्ञानं कथं मे स्यात्? इति तत्रापि मार्गो मे मनाङ् निर्देश्यः त्वया सखे!

भक्तरामः—तत्कृते तु काशिकास्था व्याघ्रभूति-कारिका द्रष्टव्या। अस्तु, कृतमिदं महेन्द्रकर्णसिंहौ करिष्यतः। वयं विरमामोऽधुना।

(इति जवनिका-पातः, निर्गताः सर्वे। ततो महेन्द्र-कर्णसिंहौ परस्परं संलपन्तौ प्रविशतः)

महेन्द्रः—सखे कर्णसिंह! भक्तरामरामनाथौ इतोऽग्रे तत्र कृत्यमस्मासु आसज्य विनिवृत्तौ। इति तु त्वं जानास्येव। अतश्च शृणु अनिट्कारिकाम् उपयोगिनीम् अहं वच्मि। तथाहि—

अनिट् स्वरान्तो भवतीति दृश्यताम्
इमांस्तु सेटः प्रवदन्ति तद्विदः।
अदन्तमृदन्तमृतां च वृङ्वृञौ—
श्विडीङिवर्णेष्वथ शीङ्श्रिञावपि॥

गणस्थमूदन्तमुतां च रुस्नुवौ—
क्षुवं तथोर्णोतिमथो युणुक्ष्णवः।
इति स्वरान्ता निपुणैः समुच्चिता-
स्ततो हलन्तानपि सन्निबोधत॥

शकिस्तु कान्तेष्वनिडेक इष्यते—
घसिश्च सान्तेषु वसिः प्रसारिणी।
रभिश्च भान्तेष्वथ मैथुने यभि—
स्ततस्तृतीयो लभिरेव नेतरे॥

इत्यादि संक्षेपः। विस्तरस्तु काशिकायां ७।२।१० सूत्रे द्रष्टव्यः।) 'अजन्तोऽकारवान् वा यस्तास्यनिट् थलि वेडयम् ऋदन्त ईदृङ् नित्यानिट् क्राद्यन्यो लिटि सेड्भवेत्।'
इति च सखे! अतिसूक्ष्मो लिटि वलादौ प्रत्यये इडनिड्नियमो ज्ञेयः

कर्णसिंहः—अस्तु अहं त्वदुक्तदिशैव एषु आर्द्धधातुक-लकारेषु रूपाणि प्रत्यययोगेन, मध्ये गुणादिकार्य्येण च चालयामि। तथाहि भू धातोः परस्मैपदे लृटि—भविष्यति, भविष्यतः भविष्यन्ति। लृङि—अभविष्यत् अभविष्यताम्, अभविष्यन्। लुटि—भविता भवितारौ, भवितारः। लुङि सिज्लुकि—अभूत् अभूताम् अभूवन् लिटि—बभूव, बभूवतु बभूवुः। आशीर्लिङि—भूयात भूयास्ताम्, भूयासुः। भाष व्यक्तायां वाचि। इति भौवादिकस्य भाष् धातोः आत्मनेपदे लृटि—भाषिष्यते, भाषिष्येते, भाषिष्यन्ते। लृङि—अभाषिष्यत, अभाषिष्येताम्, अभाषिष्यन्त लुटि—भाषिता, भाषितारौ, भाषितारः। लुङि—अभाषिष्ट, अभाषिषाताम्, अभाषिषत। लिटि—बभाषे, बभाषाते, बभाषिरे। आशीर्लिङि आत्मनेपदे—भाषिषीष्ट भाषिषीयास्ताम् भाषिषीरन्।

महेन्द्र—सखे कर्ण सिंह! एवमेव आर्धधातुकषड्लकारेषु सर्वेषामेव धातूनाम् इडनिड्भेदेनैव रूपभेदो ज्ञेयः। लिटि तु द्वित्वे

अभ्यासकार्य्यभेदे प्रत्ययकार्य्यं प्रकृतिकार्य्यञ्च बहुधा जायते।

कर्णसिंहः—मित्रवर महेन्द्रपाल! डुलभष् प्राप्तौ इति भौवादिकस्य लभ-धातोः अनिटः रूपं त्वयैव चालनीयम्। नास्ति तत्रास्माकं गतिः।

महेन्द्रः—शृणु सखे! लभ् धातोः आत्मनेपदे लृटि रूपम्। तत्र तु केवलं चर्त्वम् विशेषः। लप्स्यते लप्स्येते लप्स्यन्ते। लृङि—अलप्स्यत अलप्स्येताम् अलप्स्यन्त। लुटि सन्धिना—लब्धा, लब्धारौ, लब्धारः। लुङि—अलब्ध, अलप्साताम्, अलप्सत। लिटि—लेभे, लेभाते, लेभिरे। आशीर्लिङि—लप्सीष्ट, लप्सीयास्ताम्, लप्सीरन्। सखे। शृणु लभ् धातुस्तु परस्मैपदे नास्ति अतः रुध् धातोः परस्मैपदे लृटि—रोत्स्यति रोत्स्यतः, रोत्स्यन्ति। लृङि—अरोत्स्यत्, अरोत्स्यताम् अरोत्स्यन्। लुटि—रोद्धा, रोद्धारौ, रोद्धारः। लुङि द्विधा इरित्वादङि—अरुधत् अरुधताम्, अरुधन्। पक्षे—अरौत्सीत्, अरौद्धाम्, अरौत्सुः। लिटि—रुरोध, रुरुधतुः, रुरुधुः। आशीर्लिङि—रुध्यात्, रुध्यास्ताम्, रुध्यासुः।

कर्णसिंहः—सखे! रूपं तु त्वया एवमुक्तं येन रूप-कौमुदी-पुस्तक-घोषकाणामपि कर्णौ च्छिन्नौ।

महेन्द्रः—अयि सखे! रूप-कौमुदी-पुस्तकम्। इति किं कथयसि, नाहमव गच्छामि। सुस्पष्टं बोधय।

कर्णसिंहः—अहो! त्वं साम्प्रतिकीं संस्कृत-शिक्षादुर्दशां न जानासि किम्? अद्यत्वे तु संस्कृतच्छात्रा रूपकौमुदी-प्रभृति-पुस्तकेभ्य एव शब्द-रूपाणि धातुरूपाणि च सम्प्रघुष्यन्ति। वणिजोऽपि तादृशानि-

पुस्तकानि मुद्राप्य विक्रीणते द्रव्यलोभात्। मूल-पुतकानि कः पृच्छति। संस्कृतशिक्षा-दुर्दशा शब्दवाच्या नास्ति। घोषण-मेव सर्वत्र श्रूयते। बुद्धि-प्रयोगेण विविच्य रूपनिर्माणं दूरे गतम्। इति विचार्य्यैव अस्माकं गुरवस्तु सर्वदाऽस्मान् उप-दिशन्ति यत् केवलं क्रमेण सूत्राणि अभ्यस्यन्तु। तेष्वेव सन्धिसमासपदच्छेदान् कृत्वा अधिकारानुवृत्तिभ्याञ्च सूत्रार्थं स्वयं सम्पाद्य उत्सर्गापवादन्यायेन शतरङ्ग-क्रीडाविधया प्रयोगसिद्धिं कुर्वन्तु इति। पूर्वतना विद्वांसः पाणिनीयप्रक्रिय-यैव प्रयोग-सिद्धिं कुर्वन्त आत्मानं महावैयाकरणं कुर्वन्ति-स्म। शृणु हरदत्त-हरिगर्जनम्—

'प्रक्रिया-तर्कगहन-प्रविष्टो हृष्टमानसः।
हरदत्त-हरिः स्वैरं विहरन् केन वार्य्यते॥'

इत्थं हि पाणिनि-प्रक्रियया शिक्षिता विद्वांस आत्मबल-शालिनो महावैयाकरणा भवन्ति स्म।

महेन्द्रः—सखे! त्वया महर्षेः पाणिनेः अष्टकस्य गुरुपादैरुदीरितं आभ्यान्तरीणं मर्म स्फुटं नोदीरितम्, तदिदानीमुपसंहारे संक्षिप, इति मे अभ्यर्थना।

कर्णसिंहः—अयि सखे! अलमभ्यर्थनया। इदन्तु मे कर्तव्यमेव 'शृणु सावधानम् अष्टकमर्म।

महेन्द्रपालः—अवहितोऽस्मि। ब्रूहि—

कर्णसिंहः—सखे! प्रथमम् अष्टाध्यायी-सूत्राणि क्रमेण अभ्यसनी-यानि। ततः स्वयं सूत्रार्थं (सूत्रवृत्तिं) निर्माय प्रथमाध्यायतः

संज्ञा-परिभाषा-ज्ञानं सम्पाद्य समासज्ञानम् द्वितीयाध्यायस्य पादाभ्याम् कार्यम्। तत्रैव पञ्चमाध्यायस्यान्तपादस्थाष्टषष्टितम-सूत्रात् पादान्त सूत्रावधि समासान्त-प्रत्ययानामुपयोगोऽपि विधेयः। तथा षष्ठाध्यायस्य तृतीयपादसूत्रैः पूर्वपदकृत्यं कार्य्यम् यत्र तत्र। ततोविभक्तयर्थ-ज्ञानम् द्वितीयाध्यायस्य तृतीयपादगम्। ततो द्वितीयाध्यायान्त-पाद-ज्ञानं द्विगुरेकवचनम् २.४।१ इत्यारभ्य अर्द्धर्चाः पुंसिच २।४।३१ इत्यन्तम् समासाङ्गमेव विज्ञेयम्। अन्ते प्रकृत्यादेशलुगादिकृत्यम् तृतीयाध्याये तु धातुतः (भ्वादिसर्वगणधातुभ्यो ण्यन्तचुरादिभ्यः सनादि-प्रत्ययान्तधातुभ्यश्च) नाम्नोऽपि सन् क्यजादि-प्रत्यय योगेन धातुत्वं निर्माय ततोऽपि तिङादिप्रत्य योगेन आख्यात (तिङन्त-) पदानि निर्मेयाणि, कृत्प्रत्यययोगेन च शब्दनिर्माणं कर्तव्यम्। तत्रैव कर्मोपपद-सुबन्तोपपदप्रयोगेषु यथाप्राप्त-सिद्धिकार्य्यावसरे षष्ठतृतीयपादसूत्रैः पूर्वप्रकृतिकार्य्यमुमादि कर्तव्यम्। तथा षष्ठाष्टमाध्यायस्थ-संहिताङ्गपदाधिकार सूत्राणि च यथोपस्थितानि प्रयोज्यानि। ततश्चैवमेव चतुर्थाध्यायतः पञ्चमाध्यायान्तर. मद्रात् परिवापणे५।४।६७ इति सूत्रान्तं प्रातिपदिकशब्देभ्यः स्त्रीलिङ्गतद्धित-प्रत्यययोगेन शब्दान्तराणि निर्माय शब्दकोशा वर्द्धनीयाः। ततश्च प्राधान्येन षष्ठाध्यायादारभ्याष्टमाध्यायान्तं तिङन्तसुबन्तपदसिद्धिकृतां सूत्राणामुदाहरणेषु उपयोगो विधेयः। इति हि पाणिनीय प्रक्रियायां संक्षेपतोऽष्टकस्य मर्मविवरणम्।

महेन्द्रः—सखे कर्णसिंह! सन्धिकृत्यं षत्व-णत्व-ज्ञानं पूर्वप्रकृतिकृत्यं पदद्वित्वमित्यादिकृत्यं कस्मादध्यायाद्भवतीति न स्फुटमभिहितं

त्वया ? विदुषापि सता किमत्र कारणम् ?

कर्णसिंहः—सखे महेन्द्रपाल ! सन्धिकृत्यं तु संहिताधिकारेऽवबुध्यते। संहिताधिकारश्च लौकिको द्विरुक्तोऽस्ति। एकः षाष्ठेऽध्याये प्रथमे पादे संहितायाम् ६।१।७२ इत्यत आरभ्य अनुदात्तं पदमेकवर्जम् ६।१।१५८ इत्यतः प्राक्। द्वितीयश्च तयोर्व्वावचि संहितायाम् ८।२।१०८ इत्यत आरभ्याध्यायान्तं गच्छति। उभयमपीदं सन्धिज्ञानं स्थानप्रयत्नज्ञानानन्तरम् उपतिष्ठते। अत्र नाटकेऽपि सन्धिकृत्यं गुरुभि पञ्चचामरच्छन्दसा स्रग्विणी-छन्दसा च साधु वारद्वयमभिनीतं विद्यते। षत्व-णत्वकार्य्ये च अष्टमाध्याये तृतीयचतुर्थपादयोः क्रमशः उपदिष्टे स्तः। तत्र षत्वम् अपदान्तस्य मूर्द्धन्यः ८।३।५५ इत्यारभ्य पादान्तं चलति। णत्वन्तु तत्रैव चतुर्थपादीयरषाभ्यां नो णः समानपदे ८।४।१ इत्यारभ्य क्षुभ्नादिषु च ८।४।३९ इत्यन्तं चलति। पूर्व-प्रकृति कार्यञ्च प्राधान्येन षष्ठाध्याये तृतीयपादे चलति। तदुक्तमपि !

महेन्द्रः—अयि सखे ! सप्तसिद्धिषु प्रायः पञ्चषाः सिद्धयस्तु मया ज्ञाताः सम्प्रति नामधातु-सन्नन्त-यङ्लुङन्त-कृदन्त-तद्धितान्त-सिद्धयोऽपि संक्षेपतो बोधनीयाः।

कर्णसिंहः—अयि सुहृद्वर्य्य ! महेन्द्र ! इमास्सिद्धीस्तु श्रीनन्दकिशोर-विश्वनाथप्रसादौ करिष्यतः। वयमिदानीं श्रान्ता इत्यपसरामो रङ्गात्। (इति निष्क्रान्तौ, जवनिकापातः) इति अष्टादशं दृश्यम्। इति पञ्चमोऽङ्कः।

अथ षष्ठोऽङ्कः

अथोनत्रिंशतितमं दृश्यम्

(ततो नन्दकिशोरविश्वनाथप्रसादौ प्रविशतः अन्योऽन्यं संलपन्तौ)

नन्दकिशोरः—मित्र, विश्वनाथ ! नामधातु-प्रभृति-सिद्धीर्बोधय ।

विश्वनाथः—श्रूयताम् अहम् विवृणोमि—पुत्रमात्मन इच्छति इति विग्रहे सुप आत्मनः क्यच् ३।१।८ (प्रत्ययः परश्च कर्मण इच्छायां वा) इति कर्मणः सुबन्तात् पुत्रशब्दात् क्यच् प्रत्यये पुत्र अम् क्यच् इति स्थितौ सनाद्यन्ता धातवः ३।१।३२ इति धातुसंज्ञायां सुपो धातुप्रातिपदिकयोः २।४।७१ इति सुपोऽमः लुकि क्यचोऽनुबन्धनिवृत्तौ पुत्रय इत्यत्र क्यचि च ७।४।३३ (अङ्गस्य अवर्णान्तस्य ई) इति पुत्राकारस्य ईत्वे पुत्रीयेत्यस्मात् वर्तमाने लट् ३।२।१२३ इति लटि लः कर्मणि च भावे चाकर्मकेभ्यः ३।४।६७ इति कर्तरि अर्थेऽपि निवेशिते । लस्य स्थाने तिबादौ । सार्वधातुकत्वात् शपि अनुबन्धलोपे अतो गुणे ६।१।९७ इति पररूपे पुत्रीयति इत्यादि । एवं हि सर्वापि नामधातुसिद्धिर्ज्ञेया ।

नन्दकिशोरः—नामधातुसिद्धिस्तु त्वया साधु विवृता । सम्प्रति सन्नन्तादिसिद्धिं विवृणु—

विश्वनाथः—सन्नन्तसिद्धिस्तु न कठिना । शृणु, भवितुमिच्छतीत्यर्थे

भू सत्तायामिति भू धातोः—'धातोः कर्मणः समानकर्तृकादिच्छायां वा' ३।१।७ (सन् प्रत्ययः परः) इति सनि अनुबन्धलोपे भू स इति स्थितौ सन आर्द्धधातुकतया आर्द्धधातुकस्येड्वलादेः ७।२।३५ इति प्राप्तस्येटः सनि ग्रहगुहोश्च ७।२।१२ इति निषेधे इको झल् १।२।६ (सन् कित्) इति सनः कित्वाद्गुणनिषेधे सन्यङोः ६।१।६ (द्वे एकाचः) इति सन्नन्तस्य प्रथमस्यैकाचो भू इत्यस्य द्वित्वे पूर्वस्य च पूर्वोऽभ्यासः ६।१।४ इति अभ्यास संज्ञायाम् ह्रस्वः ७।४।५९ (अभ्यासस्य) इति अभ्यास-ह्रस्वे अभ्यासे चर्च ८।३।५४ (झलां जश्) इति जश्त्वेन भस्य बकारे आदेशप्रत्यययोः ८।३।५९ (अपदान्तस्य सः मूर्द्धन्यः इण्कोः) इति सस्य मूर्द्धन्ये बुभूषेत्यस्य सनाद्यन्ता धातवः ३।१।३२ इति धातुत्वाल्लडादिकार्ये बुभूषति इत्यादि। एवमेव विशेषसूत्रं प्रवर्त्तयन् सर्वामपि सन्नन्तसिद्धिं कुरु। इत्यलम्। यङन्तसिद्धिरपि सरलैव तथाहि—अतिशयेन पुनः पुनः भवतीति विग्रहे भू धातोः धातोरेकाचो हलादेः क्रियासमभिहारे यङ् ३।१।२२ इति यङि अनुबन्धलोपे ङित्वाद्गुणनिषेधे सन्यङोः ६।१।६ इति यङन्तस्यापि प्रथमस्यैकाचो भू इत्यस्य द्वित्वे पूर्वस्याभ्याससंज्ञायां तत्कार्य्ये च कृते गुणो यङ्लुकोः ७।४।८२ इति विशेषकार्य्येऽभ्यासगुणे बोभूय इत्यस्य सनाद्यन्ता धातवः ३।१।३२ इति धातुत्वाल्लटि तिङादिकार्य्ये अनुदात्तङित आत्मनेपदम् १।३।१२ इति ङित्वादात्मनेपदे टित आत्मनेपदानां टेरे ३।४।७९ इति टेरेत्वे सार्वधातुकतया शपि अनुबन्धलोपे

पररूपे बोभूयते इत्यादि सर्वापि यङन्त-सिद्धिर्ज्ञेया। एवं यङ् लुङन्त सिद्धिमपि एकेनैव निःश्वासेन कथयामि। सावधानमनाः शृणु—

नन्दकिशोरः—आम्, आम्! अहमवहितोऽस्मि, त्वं यथेच्छं चल—

विश्वनाथः—अतिशयेन पुनः पुनः भवतीति विग्रहे पूर्वसूत्रेण यङि तस्य च यङोऽचि च २।४।७४ इति यङो लुकि प्रत्ययलक्षणेन अन्तरङ्गत्वाद् द्वित्वादिकार्य्ये बोभू इत्यस्य प्रत्ययलक्षणेनैव धातुत्वाल्लडादिकार्य्ये च 'चर्करीतं परस्मैपदि 'अदादिवच्च' इति पाणिनिधातु-सूत्रेण परस्मैपदे तिपि अदादित्वात् शपोलुकि यङो वा ७।३।९४ (सार्वधातुके पिति हलि ईट्) इति वैकल्पिके ईटि गुणे अवादेशे बोभवीति पक्षे बोभोति। अत्र भूसुवोस्तिङि ७।३।८८ इति गुणनिषेधस्तु दाधर्ति ७।४।६५ सूत्रे 'बोभूति इति छन्दसि निपातनज्ञापना‍त् नास्ति। इति सर्वमवदातम्।

नन्दकिशोरः—भ्रातर्विश्वनाथ! तव सिद्धिप्रकारं वीक्ष्य विवर्द्धितोत्साहोऽहं कृदन्तादि सिद्धिं स्वयं करिष्यामि। यदि त्वमनुमन्यस्व।

विश्वनाथः—अहो! अयमेव तु महर्षेः स्वतन्त्र-प्रज्ञस्य वैज्ञानिको विधिः यद् घुष्टाध्यायीकाः स्वयं कृतसूत्रवृत्तिकाः छात्राः स्वयं सिद्धिमपि कुर्य्युः। त्वं यदि स्वयं सिद्धिं कर्तुमुद्यतोऽसि तर्हि त्वां शतशोऽभिनन्दन्नहं त्वां पाणिनिप्रक्रियामर्मज्ञं मत्वा महताऽदरेण श्रोष्यामि ते सिद्धिम् त्वं मेऽनुमोदनं प्रार्थयसे कथम्।



नन्दकिशोरः—साधु सखे ! साधु, साधु, समेधयसि मे समुत्साहं। तर्हि शृणु कुम्भं करोति इति विग्रहे—कर्मण्यण् ३।२।१ इति डुकृञ्करणे इति कृधातोः सुबन्ते कर्मणि कुम्भपदे उपपदे अणि कृते अनुबन्धलोपे कुम्भ अम् कृ अ इति स्थिते 'गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेः' इति परिभाषाबलेन उपपदमतिङ् २।२।१९ इति समासे कृत्तद्धितसमासाश्च १।२।४६ इति उभयथा प्रातिपदिकसंज्ञायां सुपो धातुप्रातिपदिकयोः २।४।७१ इति सुपो लुकि अचोञ्णिति ७।२।११५ इति कृ धातो र्वृद्धौ कुम्भकार इत्यस्मात् स्वादिकार्ये कुम्भकारः कुम्भकारौ कुम्भकारा इत्यादि रूपाणि ज्ञेयानि। एवं हि सर्वाऽपि कृदन्तसिद्धिर्ज्ञेया। केवलं सोपपदनिरुपपदविवेकस्तत्र विशेषः।

विश्वनाथः—अहो ! त्वया कृदन्तसिद्धिस्तु समीचीना कृता, सम्प्रति तद्धितसिद्धिमपि स्वयं कुरु—

नन्दकिशोरः—शृणु सखे ! यद्यपि सूत्रे प्रतिपादिकात् तद्धितोत्पत्तिर्विहिता तथापि सुबन्तात् तद्धितोत्पत्तेः वैयाकरण-सम्प्रदाय इति उपगोरपत्यमिति विग्रहे षष्ठीसमर्थात् उपगुशब्दात् तस्यापत्यम् ४।१।९२ इत्यणि अणश्च तद्धिताः ४।१।७६ इत्यधिकारेण तद्धितत्वाद् कृत्तद्धितसमासाश्च १।२।४६ इति प्रातिपदिकत्वात् सुपो धातुप्रातिपदिकयोः २।४।७१ इति ङसो लुकि प्रत्ययानुबन्धलोपे च उपगु अ इत्यत्र उपगु इत्यस्य अङ्गसंज्ञायाम् तद्धितेष्वचामादेः

७।२।११७ (ञ्णिति वृद्धिः) इति आदेरचो वृद्धौ ओगुणः ६।४।१४६ इत्यङ्गस्य भस्य च ओर्गुणे अवादेशे औपगव शब्दात् स्वादिकार्ये औपगवः औपगवौ इत्यादि। एवं हि सर्वापि तद्धित-सिद्धिर्ज्ञेया।

विश्वनाथः—सुहृन्नन्दकिशोर! सम्प्रति स्वयं सम्पादित-सिद्धेस्तव सन्तोषोऽभून्नवेति स्फुटं समुदीरय।

नन्दकिशोरः—सखे त्वं सन्तोषं पृच्छसि? अहन्तु व्याकरणशिक्षणस्य अभिनवमिमम् अभिनयात्मकं प्रकारं वीक्ष्य भृशं चमत्कृतोऽस्मि। स्वस्य स्वयं सिद्धिकरणज्ञानं वीक्ष्य स्वभ्रातॄणां च सर्वेषां पाणिनेरष्टकेऽन्तस्तलप्रवेशं विलोक्य नखशिखान्तमाप्यायितोऽस्मि। सर्वमपि दुर्निरूपणीयं व्याकरणविषयम् अभिनयात्मना निबद्धम् अतिसरलं निभाल्य नितान्तं विमुग्धोऽस्मि।

विश्वनाथः—अयि सखे नन्दकिशोर! भगवतो नटराजराजस्य महेशस्य। डमरुवाद्यविनिर्गतसूत्रमूलं पाणिनीयं त्रिमुनि व्याकरणं नाटकरूपे परिणतमिति किमाश्चर्यं बिभर्षि। स्वतन्त्रेऽस्मिन् भारते सम्प्रति नाटकरूपतोऽभिनयद्वारा नटराजीयं व्याकरणशास्त्रं शिक्षयन्तो भारतीया विद्वांसो द्वीपद्वीपान्तरस्थानपि मानवान् संस्कृतज्ञान् करिष्यन्तीति भारतस्य जगद्गुरुत्वं पुनरेकदा समुद्दीपितं स्यात्। संस्कृतभाषा विश्वभाषेति गुरुवर्य्याणामुक्तिः समन्विता च स्यात्। किं बहुना सर्वथा सफलमनोरथोऽहं श्रीमन्तं श्रीबदरीनाथं भगवन्तमीडे—

नमोनमस्तुभ्यमसह्यवेग-शक्तित्रयायाखिलधीगुणाय।
प्रपन्नपालाय दुरन्तशक्तये कदिन्द्रियाणामनवाप्यवर्त्मने॥



नन्दकिशोरः—साधु सखे ! साधु भगवतो बद्

प्रचारेण सहेयं पाणिनिपद्धति विश्व

स्वगौरवमासादयिष्यति। इति म

अनयैव पद्धत्या प्राचीनाः सर्वेऽपि

पाणिनीयमध्यापयन्ति स्म। छा

द्रुतं महावैयाकरणा भवन्ति स्म।

नाटकम् जानातु। साधूक्तं गुरुपादैः

अधीत्य सर्वं मुनिमार्गतः पुरा बुधा भव

यदीयवाग्वैभवमद्भुतं वयं विलोकयन्तः स्म

पाणिनेः पद्धतिर्माङ्गली सम्मता वृद्धिरादैजये

तद्दिशा पाठको वृद्धिमासेवते शीघ्रमेवार्षबुद्धिः

विश्वनाथः—प्रिय सखे नन्दकिशोर ! गुरुपादानां संकल्पसिद्धिस्तु सम्प्रत्येव सफला सम्पन्ना च दृश्यते। पश्य पश्य पाणिनीयपद्धत्तेः सर्वधातु-सिद्धेरनुगमं बोधयन्त्यौ गृहीतभूमिके द्वे आर्य्यमहिले प्राचीनव्याकरणाचार्यपरीक्षोत्तीर्णे समुपतिष्ठेते। तद्वयमपसरामः ताभ्यामवसरप्रदानेच्छया। (इति निर्गतौ जवनिकापातः) इत्यूनविंशं दृश्यम्। अथ विंशतितमं दृश्यम्। (ततो वाराणस्यां सीगरास्थे कन्या-संस्कृत-शिक्षा-मन्दिरे काशीवासकामनया समुपस्थिता कमला उप्रेती कन्यागुरुकुलाचार्या च प्रज्ञादेवी परस्परं संलपन्त्यौ प्रविशतः)

कमला—अयि प्रियसखि प्रज्ञे ! सकलधातूनां सिद्धेरनुगमं ब्रूहि यं नाद्यापि कोऽपि जानाति गणशो रूपज्ञानेऽपि।